आह्लादयस्व ताव-
च्चन्द्रकरश्चन्द्रकान्तमिव ॥ ११ ॥

६१ ताप० । जाद आणन्देहि पिदरं ।

६२ कुमा० । राजानमुपगम्य । पादग्रहणं करोति ।

६३ राजा । कुमारं परिष्वज्य पादपीठे चोपवेश्य । वत्स इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

६४ विदू० । किंति सङ्किस्सदि । अस्सम-वास-परिचिदो एव्व साहामिओ ।

६५ कुमा० । सस्मितम् । तात वन्दे ।

६६ विदू० । सत्थि भवदो ।

---

६१ जात आनन्दय पितरम् ।

६४ किमिति शङ्किष्यते । आश्रमवासपरिचित एव शाखामृगः ।

६६ स्वस्ति भवते ।

N N2 सुतस्य ते किल समामुपगतेन. U K उपनतेन. P सुखेन for सुतस्य. A N N 2 U प्रह्लादयस्व.

६१ G K omit जाद. N N2 read अणुणेहि, and U नन्देहि, for आणन्देहि.

६२ For उपगम्य G P have उपेत्य. U उपसर्पति for उपगम्य and om पादग्र° क°. K करोमि, changing the stage-direction into a speech.

६३ G K उपवेशयति for उपवेश्य. A N N2 om. च. U has simply आलिङ्ग्य for the whole stage-direction.–K G B omit वत्स. N N2 तावत् for तव. G पितृसखं, B सखायम्, and P सहायम्, for प्रियसखम्. U वत्स प्रिहसखं मे for वत्स इतस्तव पितुः प्रियसखम्.

६४ N N2 किं for किंति. A सङ्किस्सिदि. K संदिहिस्सदि. G K U ins. णं before अस्सम° &c. A सास्सम° for अस्सम°. N N2 आसमवासपरिचिओअदो एव्व से सद्धा[हा ?]महो. U णं अस्समवासपरिचिदो अहं एदस्स सहाओ. A B °परिइदो. K °परिचिद. A एस्से for एव्व. G K सहाभिओ. B सेसभावो, and P से सहावो for एव्व साहामिओ.

६५ B P वन्दामि for वन्दे.

६६ A दे for भवदो. N N2 B P सो

ततः प्रविशति उर्वशी कञ्चुकी च ।

६७ कञ्चु० । इत इतो देवी ।

६८ उर्व० । कुमारमवलोक्य । को णु खु एसो स-बाणासणो पाद-पीठे सअं महाराएण संजमीअमाण-सिहण्डओ चिट्ठदि । तापसीं दृष्ट्वा । अम्मो सच्चवदी-सूइदो मे पुत्तओ आऊ । महन्तो खु संवुत्तो । परिक्रामति ।

६९ राजा । उर्वशीं दृष्ट्वा ।

---

६८ को नु खल्वेष सबाणासनः पादपीठे स्वयं महाराजेन संयम्यमानशिखण्डकस्तिष्ठति । अहो सत्यवतीसूचितो मम पुत्रक आयुः । महान् खलु संवृत्तः ।

त्थि होदे. U सत्थि भवदे वठ्ठदु भवं. K सोत्थिभोदो.

G कञ्चुकीपूर्वा उर्वशी. B उर्वशी काञ्चुकीयश्च. K कञ्चुकी उर्वशी च.

६७ G K om. देवी. U भवती for देवी. P इदो इदो देवी.

६८ N N2 विलोक्य. U परिक्रम्यावलोक्य च. B om. कुमारं and has विलोक्य. B N N2 give the speech thus: को णु खु एसो सबाणासणो पाअवीटे [B °पीठे] ओविसिअ [B उववेसिदो] सअं महाराएण सयमीमाणं (*sic.*) सिहो[B सअज्जमाणसिहण्डो] जाअतुओ[B om.] चिट्ठदि. U कणअपीठोवविट्ठो K कणअपादपीठे omitting उपविट्ठो. P को एसो सबाणासणो पादपीठे उवेसिदो सअं महाराएण संअमिअमाणसिहो दिस्सइ. G को णु खु एसो बाणासणहत्थो कणअपादपीठोपविट्ठो सअं महाराएण सज्जीकिअमाणसिहण्डओ चिट्ठदि. U K सज्जीअमाणसिहण्डो चिट्ठदि. U om. सअं. A inserts after °पीठे the word उविसिअ. U om. सबाणासणो. A पाअवीटे. U om. °पाद°. A B P अम्हो. U अम्हहे.

A सच्चवदीए समप्पिदो, and P सच्चवई ॥ सूइदो [for सच्चवईसूइदो?], for सच्चवदीसूइदो. N N2 सच्चवादीए (*sic.*) सूइदो. G °सूचिदो. U सच्चवदीसाहिदो पुत्तको मे आऊ. B सच्चवदीसुइदो मे पुत्तो आऊ &c. A om. आऊ. N N2 मे पुत्तओसोओ(?). G आओ for आऊ. P वुत्तओ.

B K G insert सहर्षम् before परिक्रामति. U om. परिक्रामति.

६९ U B विलोक्य for उर्वशीं दृष्ट्वा. K अवलोक्य for दृष्ट्वा.

A N N2 U वत्स before इयं &c.

B P °प्रस्नवनिर्भिण्णम्. N N2 °प्रस्नवसंसिक्तमुद्वहन्ती स्तनद्वयम्. U

इयं ते जननी प्राप्ता त्वदालोकनतत्परा ।
स्नेहप्रस्नवनिर्भिन्नमुद्वहन्ती स्तनांशुकम् ॥ १२ ॥

७० तापº । जाद एहि पच्चुग्गच्छ मादरं ।

७१ कुमाº । उर्वशीं प्रत्युद्गच्छति ।

७२ उर्वº । अम्ब पाद-पणामं करेमि ।

७३ तापº । वच्छे भत्तुणो वहु-मदा होहि ।

७४ कुमाº । अम्ब अभिवादये ।

७५ उर्वº । कुमारमुन्नमितमुखं परिष्वज्य । वच्छ पिदरं आराधइत्तओ होहि । राजानमुपेत्य । जेदु जेदु महाराओ ।

---

७० जात एहि प्रत्युद्गच्छ मातरम् ।
७२ अम्ब पादप्रणामं करोमि ।
७३ वत्से भर्तुर्बहुमता भव ।
७५ वत्स पितरमाराधयिता भव । जयतु जयतु महाराजः ।

ºप्रसरº for ºप्रस्नवº.
७० A जात. N N2 om. एहि. P वच्छ, and B वच्च, for जाद एहि. B P N N2 पच्चुग्गच्छ माअरं. U पच्चुवगच्छ. K उग्गच्छ. A G पच्चुगच्छ.
७१ N N2 प्रत्युत्तिष्ठति, and U उपसर्पति for प्रत्युद्गच्छति.
७२ G K N N2 insert तापसीं प्रति before अम्ब. A अय्ये, and N N2 U अज्ज, for अम्ब. K A U P ºवन्दणं for ºपणामं. B ºप्पणामं, and ins. वो bef. करेमि. P अºए वो पादवन्दणं करोमि.
७३ A N N2 वत्से. U वच्छे. B वच्चे. G K om. वच्छे. N N2 होई.
७४ N N2 repeat अम्ब twice. U त्वामभिवन्दये for अभिवादये.
७५ G उन्नमिताननं कृत्वा. U उन्नताननं कृत्वा. K om. कुमारम्, and reads मुखमुन्नमितं कृत्वा. N N2 om. वच्छ. U वत्थ. B वच्च. G K वत्स. G आराधनन्तो. N N2 आराधइत्तणो. U K आराधअन्तो. B पितुणो आराहइत्तओ. P पिदुणो आराधइत्तओ.
N N2 होई. U प्रति for उपेत्य.
B P जेदु unrepeated. G जअदु जअदु. U जयदु जयदु.

७६ राजा । **स्वागतं पुत्रवत्यै । इत आस्यताम् ।** अर्धासनं ददाति ।

७७ उर्व० । उपविशति ।

सर्वे यथोचितमुपविशन्ति ।

७८ ताप० । **एसो गहिद-विज्जो आऊ संपदं कवअ-हरो संवुत्तो । ता एदस्स दे भत्तुणो समक्खं णिज्जादिदो हत्थणिक्खेवो । ता विसज्जेदुं इच्छामि । उवरुज्झइ मे अस्समधम्मो ।**

---

७८ एष गृहीतविद्य आयुः सांप्रतं कवचहरः संवृत्तः । तदेतस्य ते भर्तुः समक्षं निर्यातितो हस्तनिक्षेपः तद् विसर्जयितुमिच्छामि । उपरुध्यते ममाश्रमधर्मः ।

---

७६ N N2 B P इति before अर्धासनम्. U om. the stage-direction अर्धासनं ददाति.

७७ For उपविशति, B has उ° । अय्ये उपविसदु होदी, K has उ° । सव्वे उवविसन्दु, and P has उ° । अ°ओ उववसदु. U अज्जा उववसिध, and A अय्ये उवसीअदु, for उपविशति. N N2 अज्जे इदो उवसीअदु, and assign the speech to Vidûshaka.

Before सर्वे यथोचितमुपविशन्ति, G ins. राजा । सर्वे यथोचितमुपविशन्तु. B P A N N2 °स्थानं for °उचितम्. U तथेति for यथोचितम्.

७८ U ताप° । वत्से गहिदविज्जो संपदं आउसो कवअहरो संवुत्तो । एस भत्तुणो समक्खं दे णिज्जादिदो मए तुह हत्थे णिक्खवो । तुम्हेहिं विसज्जिदं आत्ताणं इच्छामि । अवरज्जदि मे अस्समवासधम्मो. A N N2 गहीद°. G गिह्वीदवेदो for गहिदविज्जो. K गहीदवेदो. G वाऊ, and N N2 आअ, for आऊ. K कवचारुहो. G कवहरो. N N2 कवचहरो. P कवअभरो. B P om. ता and दे. K G णिज्जाविदो. N N2 णिका [for ज्झा ?]दिदो. B णि° आइदो. A णिय्यादिदो. A N N2 ins. मए after णिज्जादिदो. B मह हत्थ°. A N N2 सहत्थणि°. G K सहिहत्थ°. A N N2 om. ता bef. विस°. N N2 अत्ताणं आदो विसज्जिदुमिच्छामि. A तुमादो अत्ताणं विसज्जेदुं इच्छामि. K ता तुमादो अत्ताणं विसज्जिदुमिच्छामि. P B ता [B adds मं] विसज्जेदुं इच्छामि. G ता दुमादो अत्ताणअं विसज्जिदुमिच्छामि. A उवउक्क[for ज्झ as often]दि. N N2 उवरुखदि. G उवरुद्धदि. B मह for मे. K अवराज्झदि. A आस्सम°. A ins. खु before मे.

७९ उर्व० । चिरस्स अज्जं देक्खिअ अहिअदरं अवितिण्हम्हि । ण सक्कुणोमि विसज्जिदुं । अण्णय्यं उवरोहिदुं । गच्छदु अज्जा पुणो-दंसणाअ ।

८० राजा । अम्ब भगवते च्यवनाय मां प्रणिपातय ।

८१ ताप० । एव्वं भोदु ।

८२ कुमा० । आर्ये सत्यं यदि निवर्तसे मामपि आश्रमं नेतुमर्हसि ।

८३ राजा । अयि वत्स उषितं त्वया पूर्वस्मिन्नाश्रमे । द्वितीयमध्यासितुं तव समयः ।

---

७९ चिरस्यार्यां दृष्ट्वा अधिकतरमवितृष्णास्मि । न शक्नोमि विस्रष्टुम् । अन्याय्यमुपरोद्धुम् । गच्छत्वार्या पुनर्दर्शनाय ।

८१ एवं भवतु ।

---

७९ A चिरस्स अम्मिअं देक्खिअ अहिअअरं विहूळम्हि । अणय्यं उण तव उवरोहिदुं । ता गच्छ अय्ये पुणोदंसणाअ. N N2 विरस्स अज्जू देक्खिअ [अ ?]हिअअरं विम्हअम्हि ण जुत्तं उण धम्मावरोहे वट्टिदुं ता गच्छे अज्जे पुणोवि दंसणाअ. U उ० । कामं चिरस्स पेक्खिअ विरहुक्कण्डिदम्हि ण उण [जुज्जदि or some such word left out ?] धम्मावरोधे वट्टिदुं । गच्छदु अज्जा पुणोवि दंसणस्स. G K कामं चिरस्स अज्जउत्तं पेक्खिअ अवहिदाहिअए ण जुज्जदि पुणो अस्समधम्मो विभाविदुं[G तुं] । ता अज्जा पुणोदंसणाअ गच्छदु. P B दक्खिअ.–B P अ०अं for अज्जं. B सवितण्हम्हि. B विसज्जेदुं. B ins. अहव before अण्णअं. B P अ०आ for अज्जा.

८० U आर्ये तत्रभवते च्यवनाय मत्प्रणाममावेदयिष्यसि. K omits मां.

८१ P B A N N2 होदु.

८२ G K सत्यवति for सत्यं. A N N2 आर्ये यदि सत्यमेव निवर्तसे for आर्ये सत्यवति यदि निवर्तसे. U आर्ये यदि सत्यं निवर्तनमेतत् तदा मामपि नेतुमर्हसि. A नयस्व for नेतुमर्हसि. N N2 तदा मामप्याश्रमपदं नयस्व for मामप्याश्रमं नेतुमर्हसि. B प्रति after आश्रमं. P °श्रमपदं नयस्व.

८३ A N N2 om. अयि. P and U om. अयि वत्स. U चरितं for उषितं. B उषितः. U आश्रमपदे. N N2 U अपि after द्वितीयम्. P U om. तव.

८४ ताप० जाद गुरुणो वअणं अणुचिट्ठ ।

८५ कुमा० । तेन हि

य: सुप्तवान् मदङ्के
शिखण्डकण्डूयनोपलब्धसुखः ।
तं मे जातकलापं
प्रेषय मणिकण्ठकं शिखिनम् ॥ १३ ॥

८६ ताप० । विहस्य । एव्वं करेमि । सत्थि भोदु तुम्हाणं ।

[इति निष्क्रान्ता ।

८७ राजा । कल्याणि

अद्याहं पुत्रिणामग्र्यः सत्पुत्रेणामुना तव ।
पौलोमीसंभवेनेव जयन्तेन पुरंदरः ॥ १४ ॥

८८ उर्व० । स्मृत्वा रोदिति ।

---

८४ जात गुरोर्वचनमनुतिष्ठ ।

८६ एवं करोमि । स्वस्ति भवतु युष्मभ्यम् ।

---

८४ B गुलुणो. A °चिट्ट.

८५ N N2 om. हि.
G K ममाङ्के. B मदङ्गे.
U चिराय for शिखण्ड°.
N N2 तन्मे for तं मे.
G K प्रापय. U शितिकण्ठकं.

८६ K G U एवं. A N N2 दीहाऊ होहि for सत्थि &c. After करेमि. U has: उ० । भअवदि पादवन्दणं करेमि । रा० । भगवति प्रणमामि । ताप० । सोत्थि सव्वाणं । इति निःष्क्रान्ता &c. B सस्मितम् । होदु एव्वं करीअदि । दीहाऊ होहित्ति निष्क्रान्ता. K सास्रम् before सत्थि which it reads सोत्थि. P om. विहस्य, and reads होदु आणइस्सं । दीहाऊ होहि इति निष्क्रान्ता.

८७ N N2 K om. कल्याणि. U कल्याणिनि. P उर्वशीं प्रति सुन्दरि for कल्याणि.

G reads सत्पुत्रेण तवामुना. For अद्याह which we read with U and Ranganâtha, अहं हि is read by A B G K N N2 P. A ईड्यः for अग्र्यः. K अधुना for अमुना.

८८ A स्मृत्या रोदिति.

८९ विदू० । किं णु खु तत्तहोदी एक्क-वदे अस्सु-मुही संवुत्ता ।

९० राजा । सावेगम् ।

किं सुन्दरि प्ररुदितासि ममोपपन्ने
वंशस्थितेरधिगमान्महति प्रमोदे ।
पीनोन्नतस्तनविसर्पिभिरानयन्ती
मुक्तावलीविरचनापुनरुक्तिमस्त्रैः ॥ १९ ॥

बाष्पमस्याः प्रमार्ष्टि ।

९१ उर्व० । सुणादु महाराओ पढमं उण पुत्त-दंसणेण विसुमरिदम्हि । दाणिं महिन्द-संकित्तणेण समओ मह हिअअं आआसेदि ।

---

८९ किं नु खलु तत्रभवती एकपदेऽश्रुमुखी संवृत्ता ।
९१ शृणोतु महाराजः । प्रथमं पुनः पुत्रदर्शनेन विस्मृतास्मि । इदानीं महेन्द्रसंकीर्तनेन समयो मम हृदयमायासयति ।

---

८९ A सावेगम् । भो किं णु &c. N N2 P सावेगम् before किं णु &c. G °भोदी. B विलोक्य सावेगम् before किं &c. N N2 एक्कपदं. U has the speech thus: भो किं णु ख्खु संप्पदं अत्थभोदी अस्सुमुही संवुत्ता. P B एक्कपदे. B P अस्सुपुण्णमुहि. A स्सुपुण्णमुही. N N2 अस्रमुही.

९० N N2 प्रमुदितासि(!) for प्ररुदितासि. U ममोपनीते.

B P अभिमते for अधिगमात्, and प्ररोहे for प्रमोदे.

For °विसर्पिभिः, G K have °निपातिभिः. U पीनस्तनोपरिनि.°

P U °विरचनां. A N N2 B °पुनरुक्तिम्. The rest पुनरुक्तम्. B P आस्रैः.

९१ G सुणोदु. A अहं, and N N2 अह, for पढमं उण. A N N2 पुत्तमुहदंसणेण. N N2 in fact read the speech thus: सुणादु महाराओ अह पुत्तमुहदंसणेण विसुमरिदम्हि । दाणीं महीन्दसंकीत्तणेण समअं सुमरिदाम्हि. G K दाणिं महेन्दसंकित्तणेण मम हिअए ठ्ठिदं समएण for दाणिं &c. up to आआसेदि. U सुणादु महाराओ पढमं पुत्तदंसणसमुत्थिदेण आणन्देण णन्दिदम्हि । दाणिं महिन्दसंकित्तणेण अवधी मए सुमरिदो. B सुणादु महाराओ । इमिणा अहं पुत्तमुहदंसणेण विसुमरिदम्हि । दाणिं महिन्दसंकित्तणेण सुमरिओ समओ मम हिअअं आहण्डिअदि. P सुणादु महाराओ एदप्पुत्तमुहदंसणेण

९२ राजा । कथ्यतां समयः ।

९३ उर्व० । अहं पुरा महाराअ-गहिद-हिअआ महिन्देण आणत्ता—

९४ राजा । किमिति ।

९५ उर्व । जदा एसो मम पिअ-सहो राएसी तुइ समुप्पण्णस्स वंस-करस्स मुहं पेक्खिस्सदि तदा तुए भूओवि मम समीवं आअन्तव्वंति । तदो मए महाराअ-विओअ-भीरु-

---

९३ अहं पुरा महाराजगृहीतहृदया महेन्द्रेण आज्ञापिता—

९५ यदैष मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोपि मम समीपमागन्तव्यमिति ।

विसुमरिदम्हि । दाणिं महेन्दसंकिद्दणेण समओ मह हिअअं आआसेइ. A समअं सुमराविदम्हि for समओ &c. up to आआसेदि.

९२ A N N_2 कः before समयः. P B क इव for कथ्यतां समयः.

९३ U उ० । सुणादु महाराओ । अहं पुरा महाराअगहिअहिअआ गुरुसावसंमूढा महेन्देण अवधी कदुअ अब्भवणुण्णादा. K महाराअगहीदहि°. P महाराअगहदहि°. G om. महिन्देण. K महेन्देण.

९४ U कथं for किं.

९५ U जदा मम सो पिअविअस्सो. For एसो A N N_2 have सो. A N N_2 मे रणसहाओ for मम पिअसहो. B मह for मम. N N_2 राअसी. U om. राएसी. U जदा मम सो पिअवअस्सो, and P जदा महाराओ मह विअअसहाओ, for जदा एसो मम पिअसहो राएसी. B K एसो for सो. B मह. P महाराओ मह विअअसहाओ for एसो मम पिअसहाओ राएसी. B adds पुत्तस्स after वंसकरस्स. P समुप्पण्णस्स वच्छस्स. G K समुप्पण्ण वंसहरस्स. A वंसअरस्स; N N_2 वंसहरस्स. U समुपण्णस्स सुदस्स. B P दक्खिस्सदि, A N N_2 देक्खिस्सदि, U पेक्खदि. N N_2 तदो for तदा. U तदा मम समीपं तुए आगन्दव्वंत्ति, thus omitting भूओवि. A N N_2 om. °वि after भूओ. B मह for मम. G आगदव्वंति. N N_2 आगन्तव्वमिति. P K आअन्दव्वंति.

G K महाभाअ°. P °विरह° for °विओअ°. A N N_2 B °भीरुआए. G B read the मए after °भीरुदाए. B P जादमेत्त एव्व. B P insert तिथ्यादो, and A निमंसदाए[=?] after एव्व. U om. जादमेत्तो एव्व. B विज्जाधिगम°. A P विज्जाहिगमण°. N N_2 विज्जागहण. U चिर-

दाए जाद-मेत्तो एव्व विज्जागम-णिमित्तं भअवदो चव-णस्स अस्सम-पदे अज्जाए सच्चवदीए हत्थे अप्पआसं णिक्खित्तो । अज्ज पिदुणो आराहण-समत्थो संवुत्तोत्ति कलअन्तीए णिज्जादिदो मे दीहाऊ । ता एत्तिओ मे महाराएण संवासो ।

सर्वे विषादं रूपयन्ति ।

१६ राजा । सनिश्वासम् । अहो सुखप्रत्यर्थिता दैवस्य ।

ततो मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्तं भगवतश्च्यवनस्याश्रमपदे आर्यायाः सत्यवत्या हस्ते अप्रकाशं नि-क्षिप्तः । अद्य पितुराराधनसमर्थः संवृत्त इति कलयन्त्या निर्या-तितो मे दीर्घायुः । तदेतावान् मे महाराजेन संवासः ।

कालसंगमणिमित्तं for विज्जागमणिमित्तं. A आस्सम°. N N2 अस्समवदे, U °पदेसेसु. A अय्याए. U पुत्तको before अज्जाए. B अ॰असच्चवदीए. K अज्जासच्चवदीए. P अय्याए सच्च-वईए. G भअवदीए for सच्चवदीए. A B K अप्पआसं. N N2 अप्पणा-सं[अप्पगासं?]. U अत्तणां for अप्प-आसं. G अप्पगासं. P एव्व आऊ for अप्पआसं. U णिखित्तो. K खित्तो.

P आराधइत्तओ. K om. संवुत्तो. U काउण, B ताए कालण्णाए, and K करिअ तीए, for कलअन्तीए. G ins. अ after कलअन्तीए. A णिय्यादिदो, and B णिय्याइदो, for णिज्जादिदो. N N2 संवुत्तोत्ति किदुअ णिय्यादिदो दीहाऊ । ता एतिओ(*sic.*) मे महाराएण संवासो. B om. मे. P कालेण आणिदो दिहाऊ. G महाराओ आऊ for मे दी-हाऊ. K महादुआऊ, corrected into महाआऊ. U has ओहु after दीहाऊ. B P om. ता. A जा for ता, which U altogether omits. B एत्तयो, U एत्तिको, and G इत्तिओ, for एत्ति-ओ. U reads एस, and B मह, for मे. K om. मे. P एत्तिओ एव्व मे म-हाराएण सहवासो.

For रूपयन्ति, G K have नाटय-न्ति. After the stage-direction U adds राजा । मोहमुपगच्छति । सर्वे । समस्ससदु महाराओ । कश्चु° । समाश्वस-(*sic.*)तु महाराज[:] । विदू° । अब्रह्मण्णं अवह्मण्णं । राजा । समाश्वस्य । अहो, and then it goes on, सुखप्रत्यर्थिता &c.

१६ For सनिश्वासम्, G K read सवि-षादम्. P ins. तथा हि after दैवस्य.

For सुतोपलब्ध्या G N N2 have

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि विप्रयोगः ।
व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोयम् ॥ १६ ॥

१७ विदू० । अअं सो अत्थो अणत्थाणुबन्धो संवुत्तो । संपदं तक्केमि तत्तभवदा वक्कलं गेण्हिअ तवो-वणं गन्दव्वंति ।

१८ उर्व० । मंपि मन्द-भाइणिं किद-विणअस्स पुत्तस्स लाभाणन्तरं सग्गारोहणेण अवसिद-कज्जं महाराओ समत्थेदि ।

---

१७ अयं सोर्थः अनर्थानुबन्धः संवृत्तः । सांप्रतं तर्कयामि तत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति ।

१८ मामपि मन्दभागिनीं कृतविनयस्य पुत्रस्य लाभानन्तरं स्वर्गारोहणेन अवसितकार्यां महाराजः समर्थयते ।

सुखोपलब्ध्या. We with A U B P K.

U °भिया for °रुजः. G A प्रथमाब्द°.

१७ B अयं सोहणी अथ्थो. G om. अथ्थो. N N2 हथ्थो, and K अणथ्थो, for अथ्थो. G अणत्थाणुबन्धो. B अणथ्थाणुबन्धणो. K ins. त्ति after संवुत्तो. After संवुत्तो A differs with G considerably; it goes on: पेक्खामिं तत्तभवदो पय्याउलदं हिअअस्स and altogether omits संपदं &c. N reads the whole speech thus: अअं सो हथ्थो अणत्थाणुबन्धो संवुत्तो । तत्तभवदो हिअअस्स. N2 अअं सो हत्थो अणत्थाणुबन्धो संवुत्तो ॥ पेक्खामि ॥ तत्तभवदो हिअअस्स. B दख्खामि तत्तहोदो वक्कलं गण्हिदव्वंति for संपदं &c. P अअं सो अथ्थो जो अणथ्थाणुबन्धो संवुत्तो । दख्खामि तत्तहोदिं आउलदरं हिअअस्स. G तत्तभवदो for तत्तभवदा. U विदू° । अअं सो अत्थो अणत्थाणुबन्धोत्ति तक्केमि । अत्तभवं देवराओ सअं अणग्गाहिदव्वो. K गन्तव्वंति. We with G K and Kâṭayavema as regards this speech.

१८ B मं वि. G विदविणअस्स. N N2 कदविणअस्स. U हा हदम्हि मन्दभाआ किदविणअस्स पुत्तअस्स लम्भाणन्तरं सग्गरोहणेण अवसिदकज्जं विप्पओअमुहिं महाराओ समत्थइस्सदि. A पुत्तजस्स (=पुत्तअस्स?). N N2 पुत्तस्स जम्भलाहाणन्तरं. A B अवसिदक[A क]ज्जणिव्विसेसं. N N2 अवसिदकज्जणिव्वाहसेसं(=?). K अवसिदकज्जं विप्पओअमुहिं, the latter being

९९ राजा । मा मैवम्

न हि सुलभवियोगा कर्तुमात्मप्रियाणि
प्रभवति परवत्ता शासने तिष्ठ भर्तुः ।
अहमपि तव सूनावायुषि न्यस्तराज्यो
विचरितमृगयूथान्याश्रयिष्ये वनानि ॥ १७ ॥

१०० कुमा० । नार्हति तातः पुंगवधारितायां धुरि दम्यं नियोजयितुम् ।

१०१ राजा । अयि वत्स

शमयति गजानन्यान् गन्धद्विपः कलभोपि सन्
भवति सुतरां वेगोदग्रं भुजंगशिशोर्विषम् ।
भुवमधिपतिर्बालावस्थोप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः ॥ १८ ॥

---

evidently a marginal gloss copied into the text. P reads सग्गारोहणेण after अवसिदकज्जं. B समत्थेत्ति. G K समत्थइस्सदित्ति. A N N2 समत्थइस्सदि.

९९ G K ins. सुन्दरि before मा मैवम्. G °वियोगः. K °वियोगात्. P कर्तुः. U सूनावद्य विन्यस्य राज्यम्. G विरचित°.

१०० P B नार्हति तातपुंगवधारितायां धुरि दम्यं नि[B om.]योजयितुम्. K नार्हसि तात मां नृपपुंगवधुरि &c. A G तात नार्हसि मां नृपपुंगवधारितायां &c. N N2 नार्हति. पुंगवधारितायां धुरि दम्यं नियोक्तुम्. U नार्हति तातो नृपपुंगवधारितायां धुरि दम्यं नियोजयितुम्. G A K योजयितुम्.

१०१ G K om. अयि वत्स. U मा मैवं after अयि वत्स.

U प्रभवनितरां वेगोदग्रं. G वेदोदग्रं. A वेगोद्रिक्तं corrected from some reading which it is difficult to make out. N N2 B clearly वेगोद्रिक्तम्. B विहंगशिशोः. P वेगोद्धृत्तम्.

A वयसात्यन्तेनायम्. N N2 स्वकर्मसहः. U गणः, and P नृपः, for भरः.

G K and U ins. आर्य before लातव्य. K तालव्य. G K U insert after लातव्य as follows: कञ्चु° । आज्ञापयतु देवः । राजा, and A N N2 simply आज्ञापय । राजा. We omit the additions with B

लातव्य मद्वचनादमात्यपरिषदं ब्रूहि संभ्रियतामायुषो राज्याभिषेक इति ।

१०२ कञ्चु० । यदाज्ञापयति देवः ।

[इति दुःखितो निष्क्रान्तः ।

सर्वे दृष्टिप्रविघातं रूपयन्ति ।

१०३ राजा । आकाशमवलोक्य । किं नु खलु निरभ्रे विद्युत्संपातः ।

१०४ उर्व० । विलोक्य । अम्मो भअवं णारदो ।

१०५ राजा । अये भगवान् नारदः । य एषः

गोरोचनानिकषपिङ्गजटाकलापः
संलक्ष्यते शशिकलामलवीतसूत्रः ।

---

१०४ अहो भगवान् नारदः ।

P.—N N_2 °वर्गम् for परिषदम्. U अमात्यपर्वतम्. P संनीयतां कुमारस्य राज्याभिषेकसंभार इति. G °षेकायेति. A B संभ्रियन्तां[B तां] कुमारस्यायुषो राज्याभिषेकसंभारा[B र] इति. N N_2 संभ्रियन्तां कुमारस्यायुषोभिषेकार्थं संभारा इति. U °षेकः and om. इति.

१०२ G K तथेति for यदाज्ञापयति देवः इति. A N N_2 and P सदुःखो निष्क्रान्तः. U om. यदाज्ञापयति देवः and has दुःखेन निःष्क्रान्तः. K दुःखेन निष्क्रान्तः for दुःखितो नि°. B om. दुःखितो.

G दृष्टेः प्रतिघातम्. P दृष्टिप्रातिहतिम्, U दृष्टिविघातं निरूपयन्ति.

१०३ A om. राजा. U after the stage-direction gives the King's speech thus: अतो नु खलु भोः विद्युत्संपातः । अये भगवान्नारदः and goes on: गोरोचना &c., omitting Urvas'î's speech and य एषः. P B om. stage-direction. N N_2 om. खलु. G K B insert इव after संपातः. P निरभ्रो विद्युत्°.

१०४ G K om. विलोक्य. A B अम्हो. K अये for अम्मो. K णारओ.

१०५ P om. यः. G भगवन्नारदः. N N_2 om. from अये up to एषः, and read pâdas 2, 3, as 1, 2, and *vice versâ.*

G °शयसंवृत°. N N_2 °श्रीहेम°. K हैमः प्र°. A P हैम°. B °पारिजातः for °कल्पवृक्षः.

B ससंभ्रमम् before अर्घ्यं.° N

मुक्तागुणातिशयसंभृतमण्डनश्री-
हैमप्ररोह इव जङ्गमकल्पवृक्षः ॥ १९ ॥

अर्घ्यमस्मै ।

१०६ उर्व० । यथोक्तमादाय । इअं भअवदे अरिहणा ।

ततः प्रविशति नारदः ।

१०७ नारदः । विजयतां मध्यमलोकपालः ।

१०८ राजा । उर्वशीहस्तादर्घ्यमादाय आवर्ज्य । भगवन्नभिवादये ।

१०९ उर्व० । भअवं पणमामि ।

११० नार० । अविरहितौ दंपती भूयास्ताम् ।

१११ राजा । आत्मगतम् । अपि नामैवं स्यात् । प्रकाशम् । कुमार-
माश्लिष्य । वत्स भगवन्तमभिवादयस्व ।

---

१०६ इयं भगवतेऽर्हणा ।

१०९ भगवन् प्रणमामि ।

N2 अर्घम्. U अर्घोर्घस्तावत्, and om. अस्मै.

१०६ B भअवदो अरहणा. K भअवदो. A अग्घणा, and N N2 अच्चणा, for अरिहणा. G K अअं भअवदो अग्घो. U reads इदं भअवदो अग्घं, which it assigns to कञ्चुकी.

U प्रविश्य नारदः.

१०७ G जयताम्. K विलोक्य विजयतां. २. U also repeats विजयताम्. N N2 मध्यलोक°.

१०८ N N2 अर्घम्. A अपवार्य for आवर्ज्य, which N N2 altogether omit. U also om. the stage-direction wholly. B अभ्यर्च्य for आवर्ज्य. P उर्वशीहस्तादादायापवर्ज्य. U wrongly भवन् for भगवन्. P भगवन्तम्.

१०९ B P A N N2 सुप्पसण्णे वो चलण-कमले पणवामि (B P N N2 पणमामि).

११० A भूयास्तम्. U अविरतौ.

१११ K U जनान्तिकम् for आत्मगतम्. P स्वगतम्. For कुमारमाश्लिष्य, G K simply कुमार. P om. कुमार-माश्लिष्य. K U om. वत्स.

११२ कुमा° । भगवन्नौर्वशेय आयुः प्रणमति ।

११३ नार° । आयुष्मानेधि ।

११४ राजा । अयं विष्टरोनुगृह्यताम् ।

११५ नार° । तथोपविष्टः ।

सर्वे नारदमनूपविशन्ति ।

११६ नार° । राजन् श्रूयतां महेन्द्रसंदेशः ।

११७ राजा । अवहितोस्मि ।

११८ नार° । प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति—

११९ राजा । किमाज्ञापयति ।

१२० नार° । त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरसंगरो भावी । भवांश्च सांयुगीनः सहायो नः । तेन त्वया न शस्त्रं

---

११२ N N2 पुरूरव उर्वशेयः *(sic.)* and om. आयुः. A B आयुरौर्वशेयः for और्वशये आयुः. U om. भगवन्. P और्वशीयः, and omits आयुः.

११३ U आस्तां भवान् for एधि. B P आयुष्मन्नेधि. K omits this and the following three lines.

११४ B इदं विष्टरम्. P विष्टरम्, omitting अयम्. N N2 भगवन् before वयम्. U om. अनु°.

११६ A तथा करोति. For sp. 115 together with the following stage-direction N N2 B have simply तथा सर्वे उपविशन्ति. P om. सर्वे &c. up to उपविशन्ति.

A om. नारदमनु. U तम् for नारदम्. U after the stage-direction and :before the speech of Nârada adds: राजा । सविनयम् । भगवन् किमागमनप्रयोजनम्.

११८ A G N N2 मघवान्, and B P भगवान्, for मघवा. K om. this and the following speech. N N2 कृतमतिम्. U कृतोद्यमम्. P भवन्तं वनगमनकृतबुद्धिम्.

११९ P adds भगवान् after आज्ञापयति.

१२० A N N2 त्रैकाल्यदर्शि°. B त्रैलोक्यत्रैदिभिः. A N N2 om. मुनिभिः– A NN2 आदिष्टं सुरासुरविमर्दो महान्भावीति. B सुरासुरविमर्दो भावीति. U त्रैलोक्यदर्शिभिरादिष्टसुरासुरविमर्दो भावी । भवांश्च सांयुगीनसहायस्तेन न त्वया शस्त्रशास्त्रसंन्यासः कार्यः । इयं चोर्वशी यावदायुस्ते धर्मचारिणी भवत्विति.

संन्यसितव्यम् इत्येव साधु।

संन्यस्तव्यम्। इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्त्विति।

१२१ उर्व०। अपवार्य। अम्महे सल्लं मे हिअआदो अवणीदं विअ।

१२२ राजा। परवानस्मि देवेश्वरेण।

१२३ नार०। युक्तम्।

त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः।
सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा॥ २०॥

आकाशमवलोक्य। रम्भे उपनीयतां स्वयं महेन्द्रेण संभृतः कुमारस्यायुषो यौवराज्याभिषेकः।

प्रविष्टा यथोक्तहस्ता अप्सरसः।

---

१२१ अहो शल्यं मे हृदयादपनीतमिव।

B तत्रभवान् for भवांश्च. P त्रैलोक्यविद्भिरादिष्टः पूर्वैः मुनिभिः सुरासुरविमर्दे भाविनि[°मर्दो भावीति?] भवांश्च सांयुगीनः सहायः तेन त्वया शस्त्रं न न्यसितव्यम्। इयं चोर्वशी यावदायुस्तावत्सहधर्मचारिणी भवत्विति. N N2 सांयुगीनसहायोतस्त्वया शस्त्रं न संन्यसनीयमिति. B om. नः. A संन्यसितव्यम्. B न्यासितव्यं. N N2 G K B तावत् for तव. A धर्मसहचारिणी. G K भविष्यतीति.

१२१ B आत्मगतं, and P स्वगतं, for अपवार्य, and both B and P om. अम्महे. N N2 om. अम्महे. G K om. अपवार्य. K A अम्हहे. A N N2 सल्लं विअ मम हिअआदो उद्धरिदं. G अम्महे सल्लं मे हिअए आहिदं अवणीदं. U om. stage-direction and reads अम्हहे सल्लं वि[अ?] हिअआदो अवणीदं. K हिअए साहिदं अवणीदं &c. for हिअआदो &c. P सल्लं खु मे &c.

१२२ U परमनुगृहीतोस्मि परमेश्वरेण.

१२३ P om. युक्तम्.

G त्वया कार्यं. U तव कार्यमसौ कुर्यात्त्वं च तस्येष्टकार्यकृत्। सूर्यः संवर्धयत्यग्निमग्निः सूर्यं स्वतेजसा. G K वा for च.

G K सूर्ये समेधयत्यग्निरग्निं सूर्यश्च [N N2 स्व]तेजसा. P सूर्यमग्निः स्व° for अग्निः सूर्यं च.

P B आकाशे विलोक्य. P A N N2 आनीयताम् for उपनीयताम्. In fact N and N2 give the speech thus: रम्भे आनीयतां कुमारस्यायुषो यौवराज्याभिषेकाय महेन्द्रेण संभृतः संभारः. U रम्भे उपनीयेतां भद्रपीठे। निवेशयति। नारदः। कुमारस्य शिरसि कलशमावर्ज्य। रम्भे विव(*sic.*) र्त्यतामस्य

१२४ **अप्सरसः** । **भअवं इमे अभिसेअ-संभारा ।**

१२५ **नार°** । **उपवेश्यतामायुष्मान् भद्रपीठे ।**

१२६ **रम्भा** । **इदो वच्छ ।** कुमारमुपवेशयति ।

१२७ **नार°** । कुमारस्य शिरसि कलशमावर्ज्य । **रम्भे निर्वर्त्यतां शेषो विधिः ।**

१२८ **रम्भा** । यथोक्तं निर्वर्त्य । **वच्छ पणम भअवन्तं मादा-पिदरे अ ।**

१२९ **कुमा°** । यथाक्रमं प्रणमति ।

१३० **नार°** । **स्वस्ति भवते ।**

१३१ **राजा** । **कुलधुरंधरो भव ।**

---

१२४ **भगवन्नेतेऽभिषेकसंभाराः ।**

१२६ **इतो वत्स ।**

१२७ **वत्स प्रणम भगवन्तं मातापितरौ च ।**

शेषो विधिः, thus omitting all from स्वयं महेन्द्रेण in १२३ up to उपवेशयति in १२६. B om. स्वयं महेन्द्रसंभृतः. A °षेकसंभारः for °षेकः B P °षेकविधिः. P om. स्वयं महेन्द्रेण संभृतः. P A N N2 प्रविश्याप्सरसः, and B ततः प्रविशत्यप्सरसः. (*sic.*), for the whole stage-direction.

१२४ A N N2 एदे for इमे. P N N2 K अहिसेअ°. A °संभाराः.

१२५ G K आयुष्मन् and read उपविश्यताम्. N N2 उपवि [वे?] श्यतामायुष्मान्भद्रपीठे. A B P insert अयम् before उपवेश्यतां.

१२६ B has इति after वच्छ. A N N2 assign this speech to the King.

१२७ P उपरि for शिरसि. G आवर्जयति. P आवर्जयन्. P B A N N2 insert अस्य before शेषो. K विशेषो. G K ins. पुनरुपविशति after विधिः.

१२८ U निवर्त्य. U वत्थ. A पणव. P N N2 K भअवन्तं. A N N2 insert महेसिं after भअवन्तं. G B °पिदरौ. U भअवन्तं पिदरा अ. G K U B P मादापिदरा.

१२९ U सर्वान् for यथाक्रमम्. P B क्रमेण.

१३१ U वंशवर्धनो for कुलधुरंधरो.

१३२ उर्व० । पिदुणो आराधइत्तओ होहि ।

नेपथ्ये वैतालिकौ ।

१३३ प्रथमः । विजयतां युवराजः ।

अमरमुनिरिवात्रिर्ब्रह्मणोत्त्रेरिवेन्दु-
र्बुध इव शिशिरांशोर्बोधनस्येव देवः ।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि समाप्ता वंश एवाशिषस्ते ॥ २१ ॥

१३४ द्वितीयः ।

तव पितरि पुरस्तादुन्नतानां स्थितेस्मिन्
स्थितिमति च विभक्ता त्वय्यनाकम्प्यधैर्ये ।
अधिकतरमिदानीं राजते राज्यलक्ष्मी-
र्हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥ २२ ॥

---

१३२ पितुराराधयिता भव ।

---

१३२ G K आराध[K ह]ओ, and N N_2 P आराह[P ध]इत्तणो. G आरोधओ. N N_2 होइ. U पिदुणो सेवअणाइं होदु.

A वैतालिकः. U वैतालकौ पठतः. P B वैतालिकौ पठतः.

१३३ For युवराजः, G reads महाराजः. U puts the greeting after वैतालिकौ.

G अत्रिब्रह्मणः for अत्रिर्ब्रह्मणः. U स्रष्टुः for ब्रह्मणः. N N_2 अयम् for अत्रिः.

N N_2 बोधितस्य, and P बोधकस्य, for बोधनस्य.

U तव for भव.

A N N_2 अधियशसि, P B अतिशयसि, and G अतिशयति, for अतिशयिनि. We with K U.–G समस्तान् and U समस्ता, for समाप्ता.

१३४ K उन्नता वा and N N_2 उन्नतायां, for उन्नतानां.

P स्थितिमतिषु. K °कम्पधैर्ये.

G न्यस्ततोयेव. U प्राप्ततोयेव.

१३५ अप्स० । उर्वशीमुपेत्य । दिट्ठिआ पुत्तस्स जुव-राअ-सिरीए भत्तुणो अविरहेण वड्ढसि ।

१३६ उर्व० । साहारणो एसो अब्भुदओ । कुमारं हस्ते गृहीत्वा । एहि वच्छ जेट्ठ-मादरं अभिवन्देहि ।

१३७ कुमा० । प्रतिष्ठते ।

१३८ राजा । तिष्ठ । सममेव, तत्रभवत्याः समीपं यास्यामस्तावत् ।

१३९ नार० । आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता ॥ २३ ॥

---

१३५ दिष्ट्या पुत्रस्य युवराजश्रिया भर्तुरविरहेण वर्धसे ।

१३६ साधारण एषोऽभ्युदयः । एहि वत्स ज्येष्ठमातरमभिवन्दस्व ।

---

१३५ G K विलोक्य for उपेत्य. U om. अप्सरसः । उर्वशीमुपेत्य. P सहि before दिट्ठिआ. U दिट्ठिआ प्पिअसही पुत्तअस्स जुअराअसिरिं पेक्खिअ भत्तुणो अविरहे वट्टिदि. G तव before पुत्तस्स. P कुमारस्स for पुत्तस्स. K तुमं before पुत्तस्स. A B P जोव्वरज्जसिरीए. N N_2 जोव्वराअसिरीए. G °सिरीओ. B अहेदेण(?) for अविरहेण. G K insert अ after अविरहेण. N N_2 वट्टसि. B वड्ढइ. P वध्यसि.

१३६ B G K insert णं before साहारणो. A inserts खु वो before एसो. K G साधारणो. N N_2 ins. वो before एसो, and make the speech a part of the preceding speech of अप्सरसः. U णं साधारणो ज्जेव णो अब्भवदओ. Have not we to read णो after साहारणो? It might have been easily confounded with the last syllable of that word and thus omitted by the Mss.—B P assign from कुमारं up to अभिवन्देहि to रम्भा. P om. कुमारम्. For जेठ्ठमादरं, G K have दे पढमं मादरं. A अहिवन्देहि. K अहिवादेहि. G अभिवादेहि.–U for एहि &c. has: जाद ज्जेठ्ठमादरं वन्देहि. P अहिणन्देहि. B अहिनन्देहि.

१३७ U om. कु० । प्रतिष्ठते. P B प्रस्थितः.

१३८ U तिष्ठ सममेव तत्रभवत्याः समीपं यास्यामस्तावत्.–P तिष्ठ तिष्ठ. All the Mss. except U read नार० । तिष्ठ । समये तत्रभवत्याः समीपं गच्छसि । and then the verse आयुषो &c. We with U.

१४० राजा । एवमनुगृहीतो भगवता कथं न योग्यो भविष्यति ।

१४१ नार° । किं ते भूयः पाकशासनः प्रियं करोतु ।

१४२ राजा । यदि मे मघवा प्रसन्नः किमतः परमिच्छामि । तथापीदमस्तु ।

भरतवाक्यम् ।

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरस्वत्योर्भूतयेस्तु सदा सताम् ॥ २४ ॥

इति निष्क्रान्ताः सर्वे ।

॥ इति विक्रमोर्वशीये नाटके पञ्चमोऽङ्कः ॥

॥ समाप्तमिदं विक्रमोर्वशीयं नाटकम् ॥

A N N2 गच्छ for गच्छसि. B यास्यसि. P गच्छायुष्मन्. A N N2 B have अस्य हि after गच्छासि.

G P U स्मरयति.

A B G N N2 P सेनापत्ये. We with U.

१४० G K ins. अत्र after एवम्. G भवता. N N2 read the speech thus: एवमनुगृह्यता (*sic.*) भगवता कथमन्यथा भविष्यति. A अयोग्यो for न योग्यो. B ins. असौ after कथम्. U simply reads अनुगृहीतोस्मि मरुत्वता for the whole speech.

१४१ B A N N2 P किं च [B नु] ते पाकशासनः प्रियमुपहरतु [N N2 आहरतु]. U भो राजन् किं ते भूयः प्रियमुपकरोतु पाकशासनः.

१४२ For मे G reads नाम. P भगवान् for मघवा. U reads the speech thus: अतः परमपि प्रियमस्ति यदि भवान् पाकशासनः प्रसादं करोति ततः and then reads the benediction परस्पर° &c., omitting the words भरतवाक्यम्. P K om. मे. B भगवान्मे for मे मघवा. B उत्तरमहमिच्छामि, and P उत्तरमिच्छामि, for अतः परमिच्छामि. G अतः पृच्छामि for अतः परमिच्छामि.

G K. om. the words भरतवाक्यम्.

A परस्परं for परस्पर°. N N2 सर्वलोकेपि for एकसंश्रय°.

K संगीतम्. K भूयादुद्भूतये सताम्. P प्रीतये for भूतये. U K भूयादुद्भूतये for भूतयेस्तु सदा. A N N2 सतां सदा. After this stanza U K add: सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु । सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु.

APPENDIX I.

Act IV.

WITH THE ADDITIONAL PASSAGES AS READ BY TWO MSS.

---

१ पिअ-सहि-विओअ-विमणा सहिं हंसी वाउला समुल्लवइ ।
सूर-कर-फंस-विअसिअ-तामरसे सरवरूसङ्गे ॥ १ ॥

इति चित्रलेखासहजन्ययोः प्रावेशिक्याक्षिप्तिका । ततः प्रविशति विमनस्का चित्रलेखा सहजन्या च । चित्रलेखाप्रवेशान्तरे द्विपदिकया दिशोवलोक्य ।

सहअरि-दुक्खालिद्धअं । सरवरअम्मि सिणिद्धअं ॥
वाहोवग्गिअ-णअणअं । तम्मइ हंसी-जुअलअं ॥ २ ॥

सहजन्या । चित्रलेखां विलोक्य । सहि मिलाअमाण-सदवत्तस्स विअ दे मुहस्स छाआ हिअअस्स अस्सथ्थदं सूएदि । ता कहेहि णिव्वेद-कारणं । सम-दुक्खा भविदुम् इच्छामि ।

२ चित्रलेखा । अच्छरा-वार-पज्जाएण इह भअवदो सुज्जस्स पाद-मूलोवट्ठाणं वट्टदित्ति बलिअं खु उव्वसीए उक्कण्ठिदम्हि ।

---

१ प्रियसखीवियोगविमनाः सखीं हंसी व्याकुला समुल्लपति ।
सूर्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥ १ ॥

सहचरीदुःखालीढं सरोवरे स्निग्धम् ।
बाष्पावचलिगतनयनं[1] ताम्यति हंसीयुगलम् ॥ २ ॥

सखि म्लायमानशतपत्रस्येव ते मुखस्य च्छाया हृदयस्य अ-स्वस्थतां सूचयति । तत् कथय निर्वेदकारणम् । समदुःखा भवि-तुमिच्छामि ॥

२ अप्सरोवारपर्यायेण इह भगवतः सूर्यस्य पादमूलोपस्थानं व-र्तत इति बलवत् खलूर्वश्या उत्कण्ठितास्मि ।

---

१ U पिअ°. सहि हंसि is the reading of both K and U. U वाउला. U समुल्लइ. U °करफंस°. K सरवरुत्सङ्गे.

1 Ranganâtha : बाष्पापवलिगत°.

३ सह० । जाणे वो अण्णोण्ण-सिणेहं । तदो तदो ।

४ चित्र० । तदो इमाइं दिवसाइं को णु खु वुत्तन्तोत्ति पणि-धाण-ट्ठिदाए मए अच्चाहिदं उवलद्धं ।

५ सह० । सावेगम् । कीरिसं विअ ।

६ चित्र० । उव्वसी किल तं रदि-सहाअं राएसिं अमच्चेसु णिवेसिद-रज्ज-धुरं गेण्हिअ गन्धमादण-वणं विहरिदुं गदा ।

---

३ जाने युवयोरन्योन्यस्नेहम् । ततस्ततः ।

४ तत एतेषु दिवसेषु को नु खलु वृत्तान्त इति प्रणिधानस्थितया मया अत्याहितमुपलब्धम् ।

५ कीदृशमिव ।

६ उर्वशी किल तं रतिसहायं राजर्षिममात्येषु निवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता ।

U om. इति and reads सहजन्याचित्रलेखयोः. On आक्षिप्तिका, U has the following marginal note: अप्रियश्रवणे बन्धे वधे मरणकर्मणि । परक्रमणकार्ये च विनियोज्येयमुत्तमैः ॥ साक्षिप्तिकेति संगीतशास्त्रे. K has in the margin: चच्चत्पुटादितालेन मार्गत्रयविभूषिता आक्षिप्तिका स्वरपदग्रथिता कथिता बुधैरिति भरतः। U om. चित्रलेखा° from चित्रलेखाप्रवे°.

७ सह० । सो णाम संभोओ जो तारिसेसु पदेसेसु । तदो तदो ।

८ चित्र० । तहिं खु मन्दाइणीए पुलिणेसु गदा सिअदा-पव्वद-केलीहिं कीलमाणा विज्जाधर-दारिआ उदयवदी णाम देण राएसिणा णिज्झाइदत्ति कुविदा उव्वसी ।

९ सह० । होदव्वं । दूरारूढो खु पणओ असहणो । तदो तदो ।

---

७ स नाम संभोगो यस्तादृशेषु प्रदेशेषु । ततस्ततः ।

८ तत्र खलु मन्दाकिन्याः पुलिनेषु गता सिकतापर्वतकेलीभिः क्रीडन्ती विद्याधरदारिका उदयवती नाम तेन राजर्षिणा निध्यातेति कुपिता उर्वशी ।

९ भवितव्यम् । दूरारूढः खलु प्रणयः असहनः । ततस्ततः ।

१० चित्र° । तदो भट्टिणो अणुणअं अपडिवज्जमाणा गुरु-साव-संमूढ-हिअआ इत्थिआ-जण-परिहरणिज्जं कुमार-वणं पइट्ठा । पवेसाणन्तरं च काणणोवन्तवत्ति लदाभावेण परिणदं से रूवं ।

११ सह° । णत्थि विहिणो अलङ्घणिज्जं । तस्स अणुराअस्स अअं णाम एक्क-वदे ईरिसो अणत्थो । अह किमवत्थो सो राएसी ।

१२ चित्र° । तस्सिं एव्व काणणे पियदमं विचिण्णन्तो अहो-

---

१० ततो भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं ॥ कुमारवनं प्राविष्टा । प्रवेशानन्तरं च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम् ।

११ नास्ति विधेरलङ्घनीयम् । तस्यानुरागस्य अयं नाम एकपद ईदृशोनर्थः । अथ किमवस्थः स राजर्षिः ।

१२ तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रानतिवाहयति ।

---

१२ K omits the stage-direction अनन्तरे जम्भालिका together with the whole Prakrit stanza सहअरि° &c.

रत्ते अदिवाहेदि । इमिणा उण णिव्वुदाणंपि उक्क-ण्ठा-कारिणा मेहोदएण अणत्थाहीणो हविस्सदि ।

अनन्तरे जम्भालिका ।

सहअरि-दुक्खालिद्धअं
सरवरअम्मि सिणिद्धअं ।
अविरल-वाह-जलोल्लअं
तम्मइ हंसी-जुअलअं ॥ 3 ॥

१३ सह० । सहि तारिसा आकिदि-विसेसा चिरं दुक्ख-भाइणो ण होन्ति । अवस्सं किंपि अणुग्गह-णिमित्तं भूओवि समाअम-कारणं हविस्सदि । ता एहि उदअम्मुहस्स भअवदो सुज्जस्स उवट्ठाणं करेम्ह ।

अनन्तरे खण्डधारा ।

चिन्ता-दुम्मिअ-माणसिआ । सहअरि-दंसण-लालसिआ ॥
विअसिअ-कमल-मणोहरए । विहरइ हंसी सरवरए ॥ 4 ॥

[इति निष्क्रान्ते ।

प्रवेशकः ॥

एतेन पुनर्निर्वृतानामपि उत्कण्ठाकारिणा मेघोदयेन अनर्थाधीनो भविष्यति ।

सहचरीदुःखालीढं
सरोवरे स्निग्धम् ।
अविरलबाष्पजलार्द्रं
ताम्यति हंसीयुगलम् ॥ 3 ॥

१३ सखि तादृशा आकृतिविशेषाश्चिरं दुःखभागिनो न भवन्ति । अवश्यं किमपि अनुग्रहनिमित्तं भूयोपि समागमकारणं भविष्यति । तदेहि उदयोन्मुखस्य भगवतः सूर्यस्य उपस्थानं कुर्वः ।

चिन्तादूनमानसिका । सहचरीदर्शनलालसिका ॥
विकसितकमलमनोहरे । विहरति हंसी सरोवरे ॥ 4 ॥

गहणं गइन्द-णाहो पिअ-विरहुम्माअ-पअलिअ-विआरो ।
विसइ तरु-कुसुम-किसलअ-भूसिअ-णिअ-देह-पब्भारो ॥ 5

इति पुरूरवसः प्रावेशिकी आक्षिप्तिका । ततः प्रविशति उन्मत्तवेषो राजा ।

१४ राजा । आः दुरात्मन् रक्षस्तिष्ठ तिष्ठ । क मे प्रियतमामादाय गच्छसि । हन्त शैलशिखराद् गगनमुत्पत्य वाणैर्मामभिवर्षति । [लोष्टं गृहीत्वा हन्तुं धावन् । अनन्तरे द्विपदिकया दिशोवलोक्य ।

हिअआहिअ-पिअ-दुक्खओ । सरवरए धुद-पक्खओ ॥
वाहोवग्गिअ-णअणओ । तम्मइ हंस-जुआणओ ॥ 6 ॥

पुनर्विभाव्य ।

नवजलधरः संनद्धोयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न वाणपरंपरा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ॥ १ ॥

इति मूर्छितः पतति । द्विपदिकया उत्थाय निःश्वस्य ।

मइं जाणिअ मिअ-लोअणि णिसअरु कोइ हरेइ ।
जाव णु णव-तलि सामल धाराधरु वरिसेइ ॥ 7 ॥

गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥ 5 ॥

१४ हृदयाहितप्रियादुःखः । सरोवरे धुतपक्षः ॥
बाष्पाववलिगतनयनः । ताम्यति हंसयुवा ॥ 6 ॥

मया ज्ञातं मृगलोचनीं निशाचरः कोपि हरति ।
यावन्नु नवतडित् श्यामलो धाराधरो वर्षति ॥ 7 ॥

St. 5. K U प्पिअ°.—U° प्पअलिअ°, and K °पच्चअ°, for °पअलिअ°. K विसई. K °प्पब्भारो°.

U om. इति in इति पुरूरवसः &c.

१४ St. 6. K U हिअआहिअप्पिअ°.

U °वज्जिअणअणओ.

St. 7. U णिसहरू for णिसअरु.—U कोवि.

U णवतलि सामलि. K णवतडि सामल. U धाराहरू.

१५ विचिन्त्य । क नु खलु रम्भोरूर्गता स्यात् ।

तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोयं विधिः ॥ २ ॥

१६ इति द्विपदिकया दिशोवलोक्य । सनिश्वासम् । सास्रम् । अये परा-
वृत्तभागधेयानां दुःखं दुःखानुबन्धि । कुतः ।

---

१६ जलधर संहरैतं कोपमाज्ञप्तः
अविरलधारासारदिङ्मुखक्रान्तः ।
ए अहं पृथ्वीं भ्रमन् यदि प्रियां प्रेक्षे
तदा यद्यत् करिष्यसि तत्तत् सहिष्ये ॥ 8 ॥

---

१६ St. 8. For the first pâda जल-हर° &c. K has जलधर संहर कोपनि आरंतओ where the omission of एहु is apparently accidental, the words कोपनि appear to stand for कोपञ्नि, and आरंतओ for आढत्त-ओ. Ranganâtha actually reads कोपञ्नि for कोपइं. The form को-पइं or कोपञ्नि (the ञ्नि representing the anusvâra elongated on the प) appears to be the accusative singular of कोप. The reading कोप मइ read by Lenz and the Calcutta prints appears to owe its origin to a wrong emendation of कोपइं (or कोपञ्नि). U reads कोपं for कोपइं. -आढत्तओ appears to be used here for आणत्तओ, ढ and ण being often interchangeable in the Prâkṛits, e. g. in Pânchgaṇi for Pânchgaḍhi, Dongargaṇ for Dongargaḍh.-K पिहवि. We with U and Ranganâtha. K U and Ranganâtha करीहसि for करीहिसि.

U °मुहुकन्तओ. U ए मंइ पुहुवि भमन्तो जइ प्पिअ प्पेक्खिमि । तच्चे &c. K भमंते. K पेक्खिहिमि.-K पिअं for पिअ.

१७ St. 9. K मधुम्माइअ°. U परहु-अरतूरएहिं. U प्पसरिअ.-K °व्वेल्लिर°. U °पआरेण, K °प्पआरं. K णच्चई. U कप्पअरू.

St. 10. U. तह झीणगई for बहु झीणगई which we read with K.

अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभि-
र्भवितव्यं च निरातपर्द्धिरम्यैः ॥ ३ ॥

अनन्तरे चर्चरी ।

जलहर संहर एहु कोपइं आढत्तओ
अविरल-धारासार-दिसा-मुह-कन्तओ ।
ए मइं पुहवि भमन्तो जइ पिअ पेक्खिमि
तव्वे जंजु करीहिसि तंतु सहीहिमि ॥ ४ ॥

[17] विहस्य । मुधैव खलु मनसः परितापवृद्धिरुपेक्ष्यते । यथा मुनयोपि व्याहरन्ति राजा कालस्य कारणमिति । तत् किमहं जलदसमयं न प्रत्यादिशामि ।

अनन्तरे चर्चरी ।

गन्धुम्माइअ-महुअर-गीएहिं
वज्जन्तेहिं परहुअ-तूरेहिं ।
पसरिअ-पवणुव्वेल्लिअ-पल्लव-णिअरु
सुललिअ-विविह-पआरं णच्चइ कप्प-अरु ॥७॥

इति नर्तित्वा । अथ वा न प्रत्यादिशामि यदा प्रावृषेण्यैरेव लिङ्गैर्मम राजोपचारः संप्रति । कथमिव ।

विद्युल्लेखाकनकरुचिरं श्रीवितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि ।
घर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठा
धारासारोपनयनपरा नैगमाः सानुमन्तः ॥ ४ ॥

---

[17] गन्धोन्मादितमधुकरगीतै-
र्वाद्यमानैः परभृततूर्यैः ।
प्रसृतपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारं नृत्यति कल्पतरुः ॥ ७ ॥

१८ भवतु । किमेवं परिच्छदश्लाघया । यावदस्मिन् कानने तां प्रियामन्वेषयामि । पुनश्चर्चरीपाठस्यान्ते भिन्नकः ।

दइआ-रहिओ अहिअं दुहिओ ।
विरहाणुगओ परिमन्थरओ ॥
गिरि-काणणए कुसुमुज्जलए ।
गज-जूह-वई बहु झीण-गई ॥ 10 ॥

विलोक्य । हन्त व्यवसितस्य मे संदीपनमिव संवृत्तम् । कुतः ।

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥ ५ ॥

१९ इतो गतेति कथं नु तत्रभवती मया सूचयितव्या ।

पद्भ्यां स्पृशेद् वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥ ६ ॥

---

१८ दयितारहितोऽधिकं दुःखितो ।
विरहानुगतः परिमन्थरः ॥
गिरिकानने कुसुमोज्ज्वले ।
गजयूथपतिर्बहु क्षीणगतिः ॥ 10 ॥

---

१८ U inserts the following stage-direction in place of विलोक्य viz: अनन्तरं द्विपदिकया परिक्रम्य अवलोक्य च सहर्षम्. K omits them, and with, perhaps, good reason. For सहर्षम् would seem to be wrong, because, as the sequel shows, the King is sorry. It is not possible to know whether Ranganâtha read the words.

२० द्विपदिकया परिक्रम्य अवलोक्य च सहर्षम्। उपलब्धमुपलक्षणं येन तस्याः कोपनाया मार्गोनुमीयते ।

हृतोष्ठरागैर्नयनोदबिन्दुभि-
र्निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं
शुकोदरश्याममिदं स्तनांशुकम् ॥ ७ ॥

२१ विभाव्य। कथम्। सेन्द्रगोपं नवशाद्वलमिदम्। कुतो नु खलु निर्जने वने प्रियाप्रवृत्तिरवगमयितव्या। दृष्ट्वा। अये आसारोच्छ्वसितशैलेयस्थलीपाषाणमारूढः

आलोकयति पयोदान्
प्रबलपुरोवातताडितशिखण्डः ।
केकागर्भेण शिखी
दूरोन्नमितेन कण्ठेन ॥ ८ ॥

२२ उपेत्य। यावदेनं पृच्छामि। अनन्तरे खण्डकः।

संपत्त-विसूरणओ ।
तुरिअं पर-वारणओ ॥
पिअदम-दंसण-लालसओ ।
गअ-वरु विह्मिअ-माणसओ ॥ 11 ॥

तेन खण्डकान्ते चर्चरी ।

बंहिण पइं इअ अब्भत्थिअमि आअक्खहि मं ता ।
एत्थ वण भमन्ते जइ पइं दिट्ठी सा मह कन्ता ॥
णिसमाहि मिअङ्क-सरिस-वअणा हंस-गई ।
ए चिण्हे जाणीहिसि आअक्खिउ तुज्झ मइं ॥ 12 ॥

चर्चरिकया उपविश्य अञ्जलिं बद्ध्वा ।

---

२२ संप्राप्तविसूरणः ।
त्वरितं परवारणः ॥
प्रियतमादर्शनलालसः ।
गजवरो विस्मितमानसः ॥ 11 ॥

बर्हिण त्वामित्यभ्यर्थये आचक्ष्व मे तत् ।
अत्र वने भ्रमता यदि त्वया दृष्टा सा मम कान्ता ॥
निशामय मृगाङ्कसदृशवदना हंसगतिः ।
अनेन चिह्नेन ज्ञास्यस्याख्यातं तव मया ॥ 12 ॥

---

२२ St. 11. U K प्पिअत[K द]मदं°. K गअवर.

U खण्डकेन for खण्डकान्ते.

St. 12. U K om. इअ after बंहिण पइ which we read with Ranganâtha. U तुमं for the पइं before इअ. U and Ranganâtha: अब्भत्थिअंमि. U आचक्खिहि. U मे ताम् for मं ता.

U for the 2nd pâda: एत्थ अरण्णे भ्भमन्ते जइ दिठ्ठी सा महु कन्ता. U considers the verses from बंहिण up to कन्ता as one full stanza and what follows as a separate one.—K अथ्थ for एत्थ. K आइक्खिउ for आअक्खिउ.

U णिसम्मिहि मिअङ्कसरिसे वअणे हंसगई. K U जाणिहिसि. We with Lenz.

नीलकण्ठ ममोत्कण्ठा वनेस्मिन् वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्ग दृष्टा दृष्टिक्षमा भवेत् ॥ ९ ॥

२३ चर्चरिकया अवलोक्य । कथमदत्त्वा प्रतिवचनं नर्तितुं प्रवृत्तः । किं नु खलु हर्षकारणमस्य । विचिन्त्य । भवतु । विदितमेतत् ।

मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोस्य जातः ।
रतिविगलितबन्धे केशहस्ते सुकेश्याः
सति कुसुमसनाथे किं करोत्येष बर्हीं ॥ १० ॥

२४ भवतु । परव्यसननिर्वृतं न खल्वेनं पृच्छामि । अनन्तरे खुरकः ।

विज्जझ्झर-काणण-लीणओ ।
दुक्ख-विणिग्गअ-वाहुप्पीडओ ॥
दूरोसारिअ-हिअआणन्दओ ।
अम्बर-माणे भमइ गइन्दओ ॥ 13 ॥

खुरकान्ते चर्चरी । हेले हेले

परहुअ महुर-पलाविणि कन्ति ।
णन्दण-वण सच्छन्द भमन्ति ॥

---

२४ विद्याधरकाननलीनः ।
दुःखविनिर्गतवाष्पोत्पीडः ॥
दूरोत्सारितहृदयानन्दः ।
अम्बरमानेन भ्रमति गजेन्द्रः ॥ 13 ॥

---

२३ U has पुनर्श्चचरी after प्रवृत्तः.
२४ St. 13. K विझ्झझ्झर°. U विणिग्गद°.
U दूरासारिअ°. U भ्भमइ.
U हले हले.

St. 14. K wrongly om. कन्ति. U नन्दणवणे. K भमन्तो गइन्दअे for भमन्ति. U K सच्छंदं. We with Lenz.

जइ पइं पिअअम सा महु दिट्ठी ।
ता आअक्खहि महु परपुट्ठि ॥ 14 ॥

एतदेव नर्तित्वा । वलन्तिकया उपसृत्य जानुभ्यां स्थित्वा । **भवति**

त्वां कामिनो मदनदूतिमुदाहरन्ति
मानावभङ्गनिपुणं त्वममोघमस्त्रम् ।

परभृते मधुरप्रलापिनि कान्ते ।
नन्दनवने स्वच्छन्दं भ्रमन्ति ॥
यदि त्वया प्रियतमा सा मम दृष्टा ।
तदाचक्ष्व मम परपुष्टे ॥ 14 ॥

K U तुइ for पइं which we with Ranganâtha. U दिट्ठा and wrongly reads आअ महु परपुट्ठी for the fourth pâda. K आअ-क्खुहि for आअक्खहि. We with Ranganâtha. For वलन्तिकया which we with U and Ranganâtha, K has चलिकया. Both K (see footnote on IV. २४) and U omit the words परिक्रम्य । इयमातपान्तसंधुक्षितमदा जम्बूविटपमध्यास्ते परभृता । विहंगमेषु पण्डिता जातिरेषा । यावदेनामभ्यर्थये which the other MSS. read before त्वां कामिनो &c. (see IV. २४.) But after पृच्छामि and before the words अनन्तरे खुरकः at the beginning of २४. U inserts the following, viz. द्विपदिकया दिशोवलोक्य । अये इयमातपश्रान्तसंधुक्षितमदा जम्बूविटपमध्यास्ते परभृत् (*sic*) विहगेषु पण्डितैषा जातिः । यावदेनां पृच्छामि. It is not possible to ascertain whether Ranganâtha read the words. He does not refer to them either here or after Stanza १० (मृदुपवनविभिन्नो &c.).

तामानय प्रियतमां मम वा समीपं
मां वा नयाशु कलभाषिणि यत्र कान्ता ॥ ११ ॥

२५ वामकेन किंचिद् वलित्वा । आकाशे किमाह भवती । कथं त्वामेवमनुरक्तं विहाय गतेति । शृणोतु भवती ।

कुपिता न तु कोपकारणं
सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां
न हि भावस्खलितान्यपेक्षते ॥ १२ ॥

२६ कथं कथाच्छेदकारिणी स्वकार्य एव सक्ता ।

महदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापद्गतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिमुखपाकं राजजम्बूद्रुमस्य ॥ १३ ॥

२७ एवंगतेपि प्रियेव मे मञ्जुस्वनेति न कोपोस्याम् । इतो वयम्—द्विपदिकया परिक्रामितकेन । कर्णं दत्त्वा । अये दक्षिणेन प्रि-

---

२६ After अपेक्षते U has ससंभ्रममुपविश्य । अनन्तरं जानुभ्यां स्थित्वा कुपितेति पठित्वा विलोक्य । कथं कथाच्छेद° &c.

२७ For द्विपदिकया परिक्रामितकेन कर्णं दत्त्वा which we read with K, U has द्विपदिकया परिक्रम्यावलोक्य च।

याचरणनिक्षेपशंसी नूपुररवः । यावदत्र गच्छामि ।

परिक्रम्य ।

पिअअम-विरह-किलामिअ-वअणओ ।
अविरल-वाह-जलाउल-णअणओ ॥
दूसह-दुक्ख-विसंठुल-गमणओ ।
पसरिअ-उरु-ताव-दीविअ-अङ्गओ ॥
अहिअं दुम्मिअ-माणसओ ।
काणण भमइ गइन्दओ ॥ 15 ॥

इति ककुभेन षड्पभङ्गाः । अनन्तरे द्विपदिकया दिशोवलोक्य ।

पिअ-करिणी-विछोइअओ गुरु-सोआणल-दीविअओ ।
वाह-जलाउल-लोअणओ करि-वरु- भमइ समाउलओ ॥ 16 ॥

अहो धिक् धिक् ।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसाम् ।
कूजितं राजहंसानां नेदं नूपुरशिञ्जितम् ॥ १४ ॥

प्रियतमाविरहक्लान्तवदनः ।
अविरलवाष्पजलाकुलनयनः ॥
दुःसहदुःखविसंष्ठुलगमनः ।
प्रसृतगुरुतापदीप्ताङ्गः ॥
अधिकं दूनमानसः ।
कानने भ्रमति गजेन्द्रः ॥ 15 ॥

प्रियकरिणीवियुक्तो गुरुशोकानलदीप्तः ।
बाष्पजलाकुललोचनः करिवरो भ्रमति समाकुलः ॥16॥

K पसरिअतावमणोरुवदिविअङ्गओ. We with U.

U adds दारिअं गओ after माणसओ. Ranganâtha reads दरिअं गओ (दरीं गतः) at the beginning of the pâda काणण &c. and reads काणणं for काणण. K काकणे.—U परिभमइ.

K *wrongly* विअओ for विछोइअओ.

२८ भवतु । यावदेते मानसोत्सुकाः पतत्रिणः सरसो नोत्पतन्ति तावदेतेभ्यः प्रियाप्रवृत्तिरवगमयितव्या । वलन्तिकया उपेत्य । भो भो जलविहंगमराज

पश्चात् सरः प्रति गमिष्यसि मानसं तत्
पाथेयमुत्सृज विसं ग्रहणाय भूयः ।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव ॥ १९ ॥

---

२८ For वलन्तिकया which we with U, K has चलिकया.

२९ यथोन्मुखो विलोकयति मानसोत्सुकेन मया न लक्षितेत्येवं वचनमाह । उपविश्य चर्चरी ।

रेरे हंसा किं गोइज्जइ

इति नर्तित्वोत्थाय ।

यदि हंस गता न ते नतभ्रूः
सरसो रोधसि दर्शनं प्रिया मे ॥
मदखेलपदं कथं नु तस्याः
सकलं चोर गतं त्वया गृहीतम् ॥ १६ ॥

गइ-अणुसारे मइं लक्खिज्जइ ॥

३० चर्चरिकया उपसृत्य अञ्जलिं बद्ध्वा अतश्च

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ॥ १७ ॥

पुनश्चर्चरी ।

कइं पइं सिक्खिउ ए गइ लालस ।
सा पइं दिट्ठी जहण-भरालस ॥ 17 ॥

३१ पुनश्चर्चरी । हंस प्रयच्छेत्यादि पठित्वा द्विपदिकया निरूप्य विहस्य । एष चोरानुशासी राजेति भयादुत्पतितः । परिक्रम्य । अयम्

---

२९ रेरे हंस किं गोप्यते ।
गत्यनुसारेण मया लक्ष्यते ॥
३० केन तव शिक्षिता एषा गतिर्लालसा ।
सा त्वया दृष्टा जघनभरालसा ॥ 17 ॥

---

२९ U अरे. K अरेरे, We with Ranganâtha. K गोविज्जइ.

३० U कइ पइं सिक्खिउ, and K कं पइ सिक्खउ. We with Ranganâtha. K U जघण°. We with Ranganâtha. After लालस U reads पुनश्चर्चरी. U तुइ for पइं.

U सानुनयं bef. the stage-direction हंस प्रयच्छ &c.

इदानीं प्रियासहायश्चक्रवाकः । तावदेनं पृच्छामि ।

अनन्तरे कुटिलिका ।

मम्मर-रणिअ-मणोहरए ।

मल्लघटी । कुसुमिअ-तरु-वर-पल्लवए ।

चर्चरी । दइआ-विरहुम्माइअओ ।

काणण भमइ गइन्दओ ॥ 18 ॥

द्विलयान्ते चर्चरी । गोरोअण-वण्णा चक्का भणहि मइं ।

महु-वासर कीलन्ती धणिअ ण दिट्ठी पइं ॥19॥

चर्चरिकया उपसृत्य जानुभ्यां स्थित्वा ।

रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः ॥ १८ ॥

---

२१ मर्मररणितमनोहरे ।

कुसुमिततरुवरपल्लवे ।

दयिताविरहोन्मादितः ।

कानने भ्रमति गजेन्द्रः ॥ 18 ॥

गोरोचनवर्ण चक्र भण मम ।

मधुवासरे क्रीडन्ती धनिका न दृष्टा त्वया ॥ 19 ॥

St. 18 U °म्माइओ. K U काणणे. K गइन्दअओ. K U भणइ for भणहि which we with Ranganâtha. U मए for मइ.–U धणे [= णि ?] अ ण दिठ्ठा प्पिआ. U चर्चरीकया.

[३२] कथम् कः क इत्याह । मा तावत् । न खलु विदितोहमस्य ।
सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥ १९ ॥

[३३] कथम् तूष्णीं स्थितः । भवतु । उपालप्स्ये तावदेनम् ।
सरसि नलिनीपत्त्रेणापि त्वमावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात् पृथक्स्थितिभीरुता
मयि च विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः ॥ २० ॥

[३४] सर्वथा मदीयानां भागधेयानां विपर्यायेण प्रभावप्रकाशः ।
यावदन्यमवकाशमवगाहे । पदान्तरे स्थित्वा । भवतु
न तावद् गच्छामि । द्विपदिकया परिक्रम्य अवलोक्य च ।
इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम् ।
मया दष्टाधरं तस्याः ससीत्कारमिवाननम् ॥ २१ ॥

---

[३३] U after एनम् adds: जानुभ्यां स्थित्वा । युक्तं तावत् । आत्मानुमानेन वर्तितुम् । अतः ।

३५ भवतु । अस्मिन्नेव कमलाध्यासिनि मधुकरे प्रणयित्वं करिष्ये । इतो गतस्यानुशयो मा भूदिति । अस्यान्तरे

अर्धद्विचतुरस्रकः ।

एक्कक्कम-वड्ढिअ-गुरुअर-पेम्म-रसे ।
हंस-जुआणओ कीलइ काम-रसे ॥ 20 ॥

चतुरस्रकेण उपेत्य अञ्जलिं बद्ध्वा ।

मधुकर मदिराक्ष्याः शंस तस्याः प्रवृत्तिं–

विभाव्य ।

वरतनुरथ वा ते नैव दृष्टा प्रिया मे ।
यदि सुरभिमपास्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत् पुण्डरीके किमस्मिन् ॥ २२ ॥

३६ साधयामस्तावत् । द्विपदिकया परिक्रामितकेन । एष नीपस्कन्धनिषण्णहस्तः करिणीसहायो नागराजस्तिष्ठति । अस्मात् प्रियोदन्तमुपलप्स्ये यावदुपसर्पामि । कुटिलिकया ।

---

३५ एकैकवर्धितगुरुतरप्रेमरसेन ।
हंसयुवा क्रीडति कामरसेन ॥ 20 ॥

---

३५ U °गुरुअप्पेम्मरसे. K °प्पेम्मरसे. Neither K nor U has before हंसजु° in the second line, the सरे which is read by Ranganâtha, Lenz and the Calcutta prints. Ranganâtha observes, however, रसे इति पदहीनो वा पाठः, i. e. "another version of the lines omits the words रसे."

U प्रसृत्य for उपेत्य.

३६ °विरहसं° is what Lenz and the Calcutta prints as well as our own MSS. U and K read. But does not the metre require the

करिणी-विरह-संताविअओ ॥

मल्लघटी ।

काणणए गन्धुध्धअ-महुअरु ॥ 21 ॥

अतोन्तरे विलोक्य । भवतु न त्वरा कार्या ।

अयमचिरोद्गतपल्लव-
मुपनीतं प्रियकरेणुहस्तेन ।
अभिलषतु तावदासव-
सुरभिरसं सल्लकीभङ्गम् ॥ २३ ॥

---

३६ करिणीविरहसंतापितः ॥

काननं गन्धोद्धतमधुकरः ॥ 21 ॥

ह to be long? करिणीविरहा would as usual mean करिणीविरहात्. Or करिणी-विरहें, the instrumental, would do equally well. Or have we to read करिणी-विरह-संता-विअओ? Or we may read करिणी-विरह-संताविअओ. In the latter case the short सं would well accord with सतावना (ستاونا) in Hindustani.

U काणणे.–Kगण्डुध्धुअ°.

३७ क्षणमात्रं स्थित्वा। स्थानकेन अवलोक्य। हन्त कृताह्निकः संवृत्तः। भवतु पृच्छामि।

हउं पइं पुच्छिमि अक्खहि गअ-वरु
ललिअ-पहारे णासिअ- तरु-वरु।
दूर-विणिज्जिअ-ससहरु-कन्ती
दिट्ठी पिअ पइं संमुह जन्ती ॥ 22 ॥

पदद्वयं पुरत उपसृत्य।

मदकल युवतिशशिकला
गजयूथप यूथिकाशबलकेशी।
स्थिरयौवना स्थिता ते
दूरालोके सुखालोका ॥ २४ ॥

३८ सहर्षम्। अनेन स्निग्धमन्द्रेण गर्जितेन प्रियोपलम्भशंसिना समाश्वासितोस्मि। साधर्म्याच्च त्वयि मे भूयसी प्रीतिः।
मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः ॥२५॥

---

३७ अहं त्वां पृच्छामि आचक्ष्व गजवर
ललितप्रहारेण नाशिततरुवर।
दूरविनिर्जितशशधरकान्तिः
दृष्टा प्रिया त्वया संमुखं यान्ती ॥ 22 ॥

---

३७ U has अहं यं, and K हंहु तुइ पयि, for हउं पइं Ranganâtha हइं पइं. U and Ranganâtha आअक्खहि.

K ललिअप्पहारे. U °प्पहारेण. K दूरं वणाज्जिअमंसहरुकन्ता. U पिअ.

३९ सुखमास्तां भवान् । साधयामस्तावत् । पार्श्वतो दृष्टिं दत्त्वा । अये सुरभिकन्दरो नाम विशेषरमणीयः सानुमानालोक्यते । प्रियश्चायमप्सरसाम् । अपि नाम सुतनुरस्योपत्यकायामुपलभ्येत । परिक्रम्य अवलोक्य च । हन्त मदीयैर्दुरितपरिणामैर्मेघोपि शतह्रदाशून्यः संवृत्तः । तथापि शिलोच्चयमेतमपृष्ट्वा न निवर्तिष्ये ।

अनन्तरे खण्डिका ।

पसरिअ-खर-खुर-दारिअ-मेइणि वण-गहणे अविचालु ।
परिसप्पइ पेछह लीणो णिअ-कज्जुज्जुअ कोलु ॥ 23 ॥

अपि वनान्तरमल्पकुचान्तरा
श्रयति पर्वत पर्वसु संनता ।
इदमनङ्गपरिग्रहमङ्गना
पृथुनितम्ब नितम्बवती तव ॥ २६ ॥

४० कथं तूष्णीमास्ते । शङ्के विप्रकृष्टो न शृणोतीति । समीपेस्य गत्वा पुनरेनं पृच्छामि । अनन्तरे चर्चरी ।

फलिह-सिला-अल-णिम्मल-णिज्झरु ।
बहु-विह-कुसुमे विरइअ-सेहरु ॥

---

३९ प्रसृतखरखुरदारितमेदिनिर्वनगहनेऽविचलः ।
परिसर्पति पश्यत लीनो निजकार्योद्युक्तः कोलः ॥ 23 ॥

४० स्फटिकशिलातलनिर्मलनिर्झर ।
बहुविधकुसुमैर्विरचितशेखर ॥

---

३९ U ins. द्विपदिकया परिक्रम्यावलोक्य च after भवान् and omits साधयामस्तावत् and the following stage-direction.

U प्पसरिअ°. U अविचुलु.

करि-मअराउल-कसणल-कमल-कआवरणु. A dancer wears garlands of flowers and covers himself with wreaths of young sprouts or green leaves. In the case of the so-called sea the garlands and wreaths consisted of the black lotuses in the river, at the bottom of whose stalks there were alligators that resembled elephants in their colour.

वेला-सलिलुव्वेल्लिअ-हथ्थ-दिण्ण-तालु = वेलायां यत् सलिलस्योद्वेल्लितं तेन दत्तहस्ततालः. This seems to be superfluous, being merely an incomplete repetition of the first line. The following line, if free from the suspicion that it is a later addition (see foot-notes), does not seem to refer to the dancing sea but to be an independent description of the cloudy sky that accompanied the dancing. हथ्थदिण्णतालु = दत्तहस्ततालः.

४४ St. 27. Ranganâtha : ऐरावतान्योक्त्याह । अभिनवेति । एतादृशविशेषणविशिष्टे वने भ्रमणं विरहातिशयं द्योतयति । गलितको नाट्यविशेषः ॥

°तरुवरस्य is the reading of K. It is not possible to say what Ranganâtha read, as he does not give the whole stanza. There is little doubt that अभिनवकुसुमस्तबकिततरुवरस्य परिसरे is an adjectival phrase qualifying नन्दनविपिने, and is equivalent to अभिनवकुसुमस्तबकिततरुवरपरिसरे, being a *bahuvrîhi* = अभिनवकुसुमैः स्तवकिताः तरुवराः परिसरे यस्य तत् तस्मिन्.

४६ St. 28. Ranganâtha : मृगमनुयुङ्क्ते । ...... । स्थिरयौवनात्वे सुरसुन्दरीत्वं हेतुः । एतादृशविशेषलक्षणोपलक्षिता मत्प्रिया वने भ्रमन्ती यदि त्वया दृष्टा तत् तर्हि मां विरहपारावारात् समुत्तारयेत्यर्थः । तत्कथनेनेति शेषः । काननस्य गगनोज्ज्वलत्वं तु महत्त्वनीलत्वाद्यतिशयसाधर्म्यात् । भमन्ते भ्रमता त्वयेति वा । तह तथा अनिर्वचनीयादित्यर्थ इति वा ॥

४९ St. 29. Ranganâtha: गजान्यापदेशेन । पुनराह । पणइणि° &c, He reads like us: पणइणि-वध्धासाइअओ, but renders it प्रणयिनीवद्धास्वादः He adds : प्रणयिनीवद्धासादित इति वा । प्रणयिन्या वद्धः अर्थात् स्वविरहेण अत एव आसमन्तात् सादितः कृशीकृत इत्यर्थः । प्रणयिनीवद्धाशाक इति वा । प्रणयिन्यां वद्धा आशा येन । समासान्ते कः । क्षामितवदनो म्लानीभूतास्यः । वासिअ-वअणओ इत्यपि क्वचित् पाठः । तत्र प्रसारितवदन इत्यर्थः । वासिअ इति प्रसारिते देशी ॥

६३ St. 30. Ranganâtha : दाहकअन्तीति पाठे । दाहकृतां तां । निर्गता भ्रान्तिर्यस्यां क्रियायां यथा स्यात् तथा । तामरण्येन विना करोमि । इदानीं तु अरण्याद् बहिर्निष्काशयामि पुनर्न प्रवेशयामि कदाप्यरण्यं नानयामीत्यर्थः । कृतान्तां स्वविरहेण पीडादायिकामित्यर्थः ॥ कृतः अन्तः अर्थात् सुखस्य ययेति वा । यद्वा कृतामर्थात् स्वायत्तीकृतां तामुर्वशीम् । पुनररण्यानीं न प्रवेशयामीत्यर्थः । अथवा पाठान्तरे दाहकृतम् विरहजन्यतापजनिकाम् । संयोगे च दाहं कृन्ततीति व्युत्पत्त्या दाहनाशिकामित्यर्थ इति वा ॥ रण्णे विणुकरमि = अरण्येन विनाकरोमि 'I shall separate her from a forest', 'I shall keep her away from it'.

विवि-जोए, 'fortunately.' Literally, 'by an encounter with [good] fortune.' णिब्भन्ती = निर्भ्रान्ति 'without a mistake.'

With मेलइ compare the Gujerâthî 'मेलेछे,' 'he puts.'

कलन्ती = कृतान्ताम् 'cruel', Lit. Death, who is likely to cause death by the separation.

६० St. 31. Ranganâtha : हंसविहंगमेति पाठे हंसः कलहंसः । विहंगमश्चक्रवाक इत्यर्थः ॥

७० St. 32. Ranganâtha : हंसान्यापदेशेनाह । पाविअ° &c. पुलकप्रसाधिताङ्गः 'whose person is decorated with the hairs that stood on their ends through joy.'

सङ्कलो-पत्त-विमाणओ 'to whom a *vimâna* came as he wished.
On खण्डधारा see note to १२ A St. 4.

APPENDIX III.

Extracts from different works relating to the story of Purûravas and Urvas'î.

ऋग्वेद १०. ९५.

१ पुरू० "हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मंत्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥"

२ उर्व० "किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥"

३ पुरू० "इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयंत धुनयः ॥"

४ उर्व० "सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यंतिगृहात् ।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन ॥"

५ Do. "त्रिःस्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि ।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः ॥"

६ पुरू० "या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रंथिनी चरण्युः ।
ता अंजयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवंत ॥"

७ उर्व० "समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्यः स्वगूर्ताः ।
महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥"

८ पुरू० "सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।
अप स्म मत्तरसंती न भुज्युस्ता अत्रसत्रथस्पृशो नाश्वाः ॥"

९ Do. "यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृंक्ते ।
ता आतयो न तन्वः शुंभत स्वा अश्वासो न क्रीळयो दंदशानाः ॥"

१० Do. "विद्युन्न या पतंती दविद्योद्भरंती मे अप्या काम्यानि ।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥"

११ उर्व० "जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः ।
अशासं त्वा विदुषी सस्मिन्नहन्न म आश्टणोः किमभुग्वदासि ॥"

१२ पुरू० "कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् ।
को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥"

१३ उर्व० "प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रंददाध्ये शिवायै ।
प्र तत्ते हिनवा यत्ते असे परेह्यस्तं नहि मूर मापः ॥"

१४ पुरू० "सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गंतवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥"

१५ उर्व० "पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता ॥"

१६ Do. "यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥"

१७ पुरू० "अंतरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥"

१८ उर्व० "इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबंधुः ।
प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥"

Griffith's translation of R. V. X. 95.

1 Ho there, my consort! Stay, thou fierce-souled lady, and let us reason for a while together. Such thoughts as these of ours, while yet unspoken in days gone by have never brought us comfort.

2 What am I now to do with this thy saying? I have gone from thee like the first of Mornings. Purûravas, return thou to thy dwelling: I, like the wind, am difficult to capture.

3 Like a shaft sent for glory from the quiver, or swift steed winning cattle, winning hundreds, the lightning seemed to flash, as cowards planned it. The minstrels bleated like a lamb in trouble.

4 Giving her husband's father life and riches, from the near dwelling, when her lover craved her, she sought the home wherein she found her pleasure, accepting day and night her lord's embraces.

5 Thrice in the day didst thou embrace thy consort, though coldly she received thy fond caresses. To thy desires, Purûravas, I yielded: so wast thou king, O hero, of my body.

6 The maids Sujûrṇi, Sreṇi, Sumne-âpi, Charaṇyu, Granthinî, and Hradechakshus,—these like red kine have hastened forth, the bright ones, and like milch—cows have lowed in emulation.

7 While he was born the Dames sate down together, the Rivers with free kindness gave him nurture; and then, Purûravas, the gods increased (strengthened) thee for mighty battle, to destroy the Dasyus.

8 When I, a mortal, wooed to mine embraces these heavenly nymphs who laid aside their raimant, like timid does they fled from me in terror, like chariot horses when the car has touched them.

9 When, loving these immortal ones, the moral hath converse with the nymphs as they allow him, like swans they show the beauty of their bodies, like horses in their play they bite and nibble.

10 She who flashed brilliant as the falling lightning brought me delicious presents from the waters. Now from the flood be born a strong young hero! May Urvas'î prolong her life for ever!

11 Thy birth hath made me drink from earthly milch-kine: this power, Purûravas, hast thou vouchsafed me. I knew, and warned thee, on that day. Thou wouldst not hear me. What sayest thou, when naught avails thee?

12 When will the son be born and seek his father? Mourner-like, will he weep when first he knows him? Who shall divide the accordant wife and husband, while fire is shining with thy consort's parents?

13 I will console him when his tears are falling: he shall not weep and cry for care that blesses. That which is thine, between us, will I send thee. Go home again, thou fool; thou hast not won me.

14 Thy lover shall flee forth this day for ever, to seek, without return, the farthest distance. Then let his bed be in Destruction's bosom, and then let fierce rapacious wolves devour him.

15 Nay, do not die, Purûravas; nor perish: let not the evil-omened wolves devour thee. With women there can be no lasting friendship: hearts of hyenas are the hearts of women.

16 When amid men in altered shape I sojourned, and through four autumns spent the nights among them, I tasted once a day a drop of butter; and even now with that am I contented.

17 I, her best love, call Urvas'î to meet me, her who fills air and measures out the region. Let the gift brought by piety approach thee. Turn thou to me again: my heart is troubled.

18 Thus speak these gods to thee, O son of Iḷâ. As Death hath verily got thee for his subject, thy sons shall serve the gods with their oblation, and thou, moreover, shalt rejoice in Svarga.

बृहद्देवता ७. १४०—१४७.

" पुरूरवसि राजर्षावप्सरास्तूर्वशी पुरा । न्यवसत् संविदं कृत्वा तस्मिन्धर्मं चचार च ॥ तया तस्य च संवासमसूयन् पाकशासनः । पैतामहं चानुरागमिन्द्रवच्चापि तस्य तु ॥ स तयोस्तु वियोगार्थं पार्श्वस्थं वज्रमब्रवीत् । प्रीतिं भिन्ध्यनयोर्वज्र मम चेदिच्छसि प्रियम् ॥ तथेत्युक्त्वा तयोः प्रीतिं वज्रो भिदति मायया । ततस्तया विहीनस्तु चचारोन्मत्तवन्नृपः ॥ चरन् सरसि सोऽपश्यदभिरूपामिवोर्वशीम् । सखीभिरभिरूपाभिः पंचभिः पार्श्वतो वृताम् ॥ तामाह पुनरेहीति नेति सा त्वब्रवीन्नृपम् । तामुपाह्वयत प्रीत्या दुःखात्सा त्वब्रवीन्नृपम् ॥ अप्राप्याहं त्वयावेह स्वर्गे प्राप्स्यसि मां पुनः । आह्वानं प्रति चाख्यानमितरेतरयोरिदम् ॥ संवादं मन्यते यास्क इतिहासं तु शौनकः । हय इति..................... ॥"

शतपथब्राह्मण ५. १—२.

उर्वशीह अप्सराः पुरूरवसं ऐडं चकमे । तं ह विन्दमाना उवाच । .... । अकामां स्म मा निपद्यासै । मो स्म त्वा नग्नं दर्शम् । एष वै न स्त्रीणामुपचारः इति । सा ह अस्मिन् योक् उवास । अपि ह अस्मात् गर्भिणी आस । तावत् ज्योक् ह अस्मिन् उवास । ततो ह गन्धर्वाः समूदिरे । ज्योक् वा इयं उर्वशी मनुष्येषु अवात्सीत् । उपजानीत यथेयं पुनरागच्छेत् इति । तस्यै ह आविर् द्व्युरणा शयने उपबद्धास । ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः । सा ह उवाच । अवीरे इव बत मे अजने इव पुत्रं हरन्ति इति । द्वितीयं प्रमेथुः । सा ह तथैव उवाच । अथ ह अयं ईक्षांचक्रे । कथं नु तत् अवीरं कथं अजनं स्यात् यत्र अहं स्यां इति । स नग्न एव अनु उत्पपात । चिरं तत् मेने यत् वासः पर्यधास्यत । ततो ह गन्धर्वा विद्युतं जनयांचक्रुः । तं यथा दिवा एवं नग्नं ददर्श । ततो ह एव इयं तिरोबभूव । पुनर् ऐमि इति एत् । तिरोभूतां स आध्या जल्पन् कुरुक्षेत्रं समया चचार । अन्यतः प्लक्षा इति बिसवती तस्यै ह आध्यन्तेन वव्राज । तत् ह ता अप्सरस आतयो भूत्वा परिपुप्लुविरे । तं ह इयं ज्ञात्वा उवाच । अयं वै स मनुष्यः यस्मिन् अहं अवात्सम् इति । ता ह ऊचुः । तस्मै वै आविर् असाम इति । तथेति । तस्मै ह आविर् आसुः । तां ह अयं ज्ञात्वा अभिपरोवाद । " हये जाये मनसा तिष्ठ

घोरे वचांसि मिश्रा कृणवावहै नु । न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चन अहन् ” इति । उप नु रम सं नु वदावहै इति ह एव एनां तत् उवाच । तं ह इतरा प्रत्युवाच । “ किमेता वाचा कृणवा तव अहं प्राक्रमिषं उषसां अग्रिया इव पुरूरवः पुनर् अस्तं परेहि दुरापना वात इव अहं अस्मि ” इति । न वै त्वं तत् अकरोः यत् अहं अब्रवं । दुरापा वै अहं त्वया एतर्हि अस्मि । पुनर् गृहान् एहि इति ह एव एनं तत् उवाच । अथ ह अयं परिद्यून उवाच । “ सुदेवः अद्य प्रपतेत् अनावृत् परावतं परमां गन्तवै उ अधा शयीत निर्ऋतेः उपस्थे अधा एनं वृका रभसासः अद्युः” इति । सुदेवः अद्य उत् वा बध्नीत प्रवा पतेत् तत् एनं वृका वा श्वानः वा अद्युः इति ह एव तत् उवाच । तं ह इतरा प्रत्युवाच । “ पुरूरवो मा मृथा मा प्रपप्तः मा त्वा वृकासः अशिवासः उ क्षन् न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयानि एता ” इति । मा एतत् आदृथाः । न वै स्त्रैणं सख्यं अस्ति । पुनर् गृहानिहि इति ह एव एनं तत् उवाच । “ यत् विरूपा अचरम् मर्त्येषु अवसम् रात्रीः शरदः चतस्रः । घृतस्य स्तोकं सकृत् अह्नः आश्नां तात् एव इदं तातृपाणा चरामि ” इति । तत् एतत् उक्तप्रत्युक्तं पञ्चदशर्चं बह्वृचाः प्राहुः । तस्यै ह हृदयं आव्ययांचकार । सा ह उवाच । संवत्सरतमीं रात्रिं आगच्छतात् । तत् मे एकां रात्रिं अन्ते शयितासे । जात उ ते अयं तर्हि पुत्रः भविता इति । स ह संवत्सरतमीं रात्रिं आजगाम इत् हिरण्यविमितानि । ततो ह एनं एकं ऊचुः एतत्प्रपद्यस्व इति । तत् ह अस्मै तां उपप्रजिघ्युः । सा ह उवाच । गन्धर्वा वै ते प्रातर् वरं दातारः तं वृणासै इति । तं वै मे त्वम् एव वृणीष्व इति । युष्माकं एव एकः असानि इति ब्रूतात् इति । तस्मै ह प्रातर् गन्धर्वा वरं ददुः । स ह उवाच । युष्माकं एव एकः असानि इति । ते ह ऊचुः । न वै सा मनुष्येष्वग्नेर्यज्ञिया तनूरस्ति यया इष्ट्वा अस्माकं एकः स्यात् इति । तस्मै ह स्थाल्यामोप्याग्निं प्रददुः । अनेन इष्ट्वा अस्माकं एकः भविष्यसि इति । तं च ह कुमारं च आदाय आवव्राज । सः अरण्ये एव अग्निं निधाय कुमारेणैव ग्रामं एयाय । पुनर् ऐमि इति एत् तिरोभूतं । यः अग्निः अश्वत्थं तं या स्थाली शमीं तां । स ह पुनर् गन्धर्वान् एयाय । ते ह ऊचुः । संवत्सरं चातुष्प्राश्यमोदनं पच । स एतस्य एव अश्वत्थस्य तिस्रः तिस्रः समिधो घृतेन अन्वज्य समीद्वतीभिः घृतवतीभिः ऋग्भिः अभ्याधत्तात् । स यः ततः अग्निः जनिता स एव स भविता इति । ते ह ऊचुः । परोक्षमिव वै एतत् । आश्वत्थीं एव उत्तरारणिं कुरुष्व । शमीमयीं अधरारणिं । स यः ततः अग्निः जनिता स एव स भविता इति । स आश्वत्थीं एव उत्तरारणिं चक्रे । आश्वत्थीं अधरारणिम् । स यः ततः अग्निः जज्ञे स एव स आस । तेन इष्ट्वा गन्धर्वाणामेकः आस । तस्मादाश्वत्थीमेव उत्तरारणिं कुर्वीत आश्वत्थीमधरारणिं । स यः ततः अग्निः जायते स एव स भवति तेन इष्ट्वा गन्धर्वाणामेको भवति ।

विष्णुपुराण ४. ६.

पुरूरवास्त्वतिदानशीलोऽतितेजस्वी यं सत्यवादिनमतिरूपस्विनं मित्रावरुणशापान्मानुषे लोके मया वस्तव्यमिति कृतमतिरुर्वशी ददर्श। दृष्टमात्रे च यस्मिन्नपहाय मानमशेषस्वर्गसुखाभिलाषमपास्य तन्मना भूत्वा तमेव चोपतस्थे। सोऽपि च तामतिशयितसकललोकस्त्रीकांतिसौकुमार्यलावण्यातिविलासहासादिगुणामवलोक्य तदायत्तचित्तवृत्तिर्बभूव। उभयमपि तन्मनस्कमनन्यदृष्टि परित्यक्तसमस्तान्यप्रयोजनमासीत्। राजा तु प्रागल्भ्यात्तामाह। सुभ्रु त्वामहमतिकामोऽस्मि प्रसीदानुरागमुद्वह। इत्युक्ता लज्जावखण्डितमुखमुर्वशी प्राह। भवत्वेवं यदि मे समयपरिपालनं भवान्करोति। आख्याहि मे समयमित्यथ पृष्टा पुनरब्रवीत्। शयनसमीपे ममोरणकद्वयं पुत्रभूतं नापनेयम्। भवांश्च मया नग्नो न द्रष्टव्यः। घृतमात्रं च ममाहार इति। एवमेवेति भूपतिराह। तया च सहावनीपतिरलकायां चैत्ररथादिवनेष्वमलपद्मखण्डेषु सरःस्वभिरममाण एकषष्टिं वर्षसहस्राण्यनुदिनप्रवर्धमानप्रमोदोऽनयत्। उर्वशी च तदुपभोगादनुदिनप्रवर्धमानानुरागामरलोकवासेऽपि न स्पृहां चकार। विना चोर्वश्या सुरलोकोऽप्सरसां सिद्धगन्धर्वाणां च नातिरमणीयोऽभूत्। ततश्चोर्वशीपुरूरवसोः समयविद्विश्वावसुर्गन्धर्वसमवेतो निशि नयनाभ्यासादेकमुरणकं जहार। तस्य चाकाशे नीयमानस्योर्वशी शब्दमशृणोत्। आह च। ममानाथायाः पुत्रः केनाप्यपह्रियते। कं शरणमुपयामि। इत्याकर्ण्य राजा नग्नं मां देवी द्रक्ष्यतीति न ययौ। अथान्यमप्युरणकमादाय गन्धर्वा ययुः। तस्याप्यपह्रियमाणस्य शब्दमाकर्ण्याकाशे पुनरप्यनाथास्म्यहमभर्तृका कुपुरुषाश्रयेत्यार्तवाणी बभूव। राजाप्यमर्षवशादंधकारमेतदिति खड्गमादाय दुष्ट हतोसीति व्याहरन्नभ्यधावत्। तावच्च गन्धर्वैरतीवोज्वला विद्युज्जनिता। तत्प्रभया चोर्वशी राजानमपगताम्बरं दृष्ट्वापवृत्तसमया तत्क्षणादेवापक्रान्ता। परित्यज्य तावुरणकौ गन्धर्वाः सुरलोकमुपगताः। राजापि च तौ मेषावादाय हृष्टमनाः स्वशयनमायातो नोर्वशीं ददर्श। तां चापश्यन्नपगताम्बर एवोन्मत्तरूपो बभ्राम। कुरुक्षेत्रे चाम्भोजसरस्यन्याभिश्चतुर्भिरप्सरोभिः समवेतामुर्वशीं ददर्श। ततश्चोन्मत्तरूपो "जाये ह तिष्ठ मनसि घोरे तिष्ठ वचसि" (ऋग्वेद १०–९५) इत्यनेकप्रकारं सूक्तमवोचत्। आह चोर्वशी। महाराज अलमनेनाविवेकचेष्टितेन। अंतर्वत्न्यहम्। अब्दान्ते भवतात्रागन्तव्यम्। कुमारस्ते भविष्यति। एकां च निशामहं त्वया सह वत्स्यामि। इत्युक्तः प्रहृष्टः स्वपुरमाजगाम। तासां चाप्सरसामुर्वशी कथयामास। अयं पुरुषोत्कर्षो येनाहमेतावन्तं कालमनुरागाकृष्टमनसा सहोषिता। इत्येवमुक्तास्तामप्सरस ऊचुः। साधु साध्वस्य रूपम्। अनेन सहास्माकमपि सर्वकालमभिरन्तुं स्पृहा भवेत्। इत्यब्दे च पूर्णे स राजा तत्राजगाम। कुमारं चायुषमसौ तदोर्वशी ददौ। एकां च निशां तेन राज्ञा सहोषित्वा पञ्चपुत्रोत्पत्तये गर्भमवाप। उवाचैनं राजानम्। अस्मत्प्रीत्या महाराजाय सर्वे एव गन्धर्वा वरदाः सन्तुष्टाः।

तस्माद्ध्रियतां वर इति । आह राजा च विजितसकलारातिरविहतेन्द्रियसामर्थ्यो बंधुमानमितबलकोशः । नान्यदस्माकमुर्वशीसालोक्यादप्राप्यमस्ति । तदहमनया सहोर्वश्या कालं नेतुमभिलषामि । इत्युक्ते गन्धर्वा राज्ञेऽअग्निस्थालीं ददुः । ऊचुश्चैनम् । अग्निमाम्नायानुसारीभूत्वा त्रिधा कृत्वोर्वशीसलोकतामनोरथमुद्दिश्य सम्यग्यजेथाः । ततोवश्यमभिलषितमवाप्स्यसि । इत्युक्तस्तामग्निस्थालीमादायाजगाम । अंतरटव्यामचिन्तयत् । अहो मेऽतिमूढता यदग्निस्थाली मयानीता नोर्वशीति । अथैनामटव्यामेवाग्निस्थालीं तत्याज । स्वपुरं चाजगाम । व्यतीतार्धरात्रौ विनिद्रश्चाचिंतयत् । ममोर्वशीसालोक्यप्राप्त्यर्थमग्निस्थाली गन्धर्वैर्दत्ता । सा च मयाटव्यां परित्यक्ता । तदहं तत्र तदाहरणाय यास्यामि । इत्युत्थाय तत्राप्युपगतो नाग्निस्थालीमपश्यत् । शमीगर्भं चाश्वत्थमग्निस्थालीस्थाने दृष्ट्वाचिंतयत् । मयात्र स्थाली निक्षिप्ता सचाश्वत्थः शमीगर्भोऽभूत् । तदेतदेवाहमग्निरूपमादाय स्वपुरमभिगम्यारणिं कृत्वा तदुत्पन्नाग्नेरुपास्तिं करिष्यामीति । एवमेव स्वपुरमुपगतोऽरणिं चकार । तत्प्रमाणं चाङ्गुलैः कुर्वन् गायत्रीमपठत् । पठतश्चाक्षरसंख्यान्येवांगुला[न्य]रण्यभवत् । तत्राग्निं निर्मथ्याग्नित्रयमाम्नायानुसारी भूत्वा जुहाव । उर्वशीसालोक्यं चेहफलमभिसंहितवान् । तेनैवाग्निविधिना बहुविधान् यज्ञानिष्ट्वा गन्धर्वलोकान्प्राप्योर्वश्या सह वियोगं नाप । एकोग्निरादावभवदैलेन त्वत्र मन्वन्तरे त्रेता प्रवर्तिता ।

भागवत ९. १४.

ततः पुरूरवा जज्ञे इलायां य उदाहृतः ।
तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥
श्रुत्वोर्वशीन्द्रभवने गीयमानान्सुरर्षिणा ।
तदन्तिकमुपेयाय देवी स्मरशरार्दिता ॥

मित्रावरुणयोः शापादापन्ना नरलोकताम् ।
निशम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ॥
धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ।
स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ।
उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥

स्वागतं ते वरारोहे आस्यतां करवाम किम् ।
संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥

कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर ।
यदङ्गान्तरमासाद्य च्यवते हि रिरंसया ॥

एतावुरणकौ राजन्न्यासौ रक्षस्व मानद ।
संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥

घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वा ········ ।
विवाससं तत्तथेति प्रतिपेदे महामनाः ॥
अहो रूपमहो भावो नरलोकविमोहनम् ।
को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥
तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः ।
रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥
रममाणस्तया देव्या पद्मकिञ्जल्कगन्धया ।
तन्मुखामोदमुषितो मुमुदेऽहर्गणान् बहून् ॥
अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समनोदयत् ।
उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥
त उपेत्य महारात्रे तमसि प्रत्युपस्थिते ।
उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ।
निशम्याक्रन्दितं देवी पुत्रयोर्नीयमानयोः ।
हतास्म्यहं कुनाथेन नपुंसा वीरमानिना ॥
यद्विश्रम्भादहं नष्टा हतापत्या च दस्युभिः ।
यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥
इति वाक्सायकैर्विद्धः प्रतोत्रैरिव कुञ्जरः ।
निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद्रुषा ॥
ते विसृज्योरणौ तत्र व्यद्योतन्त स्म विद्युतः ।
आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥
ऐलोपि शयने जायामपश्यन्विमना इव ।
तच्चित्तो विह्वलः शोचन्बभ्रामोन्मत्तवन्महीम् ॥
स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ।
पञ्च प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥
अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।
मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥
सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया ।
खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥
मा मृथाः पुरुषोसि त्वं मा स्म त्वाद्युर्वृका इमे ।
क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥
स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥

विधायालीकविश्रम्भमज्ञेषु त्यक्तसौहृदाः ।
नवं नवमभीप्स्यन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥

संवत्सरान्ते हि भवानेकरात्रं मयेश्वर ।
वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ॥

अन्तर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम् ।
पुनस्तत्र गतोऽब्दान्त उर्वशीं वीरमातरम् ॥

उपलभ्य मुदा युक्तः समुवास तया निशाम् ।
अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥

गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ।
तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ।
उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन्वने ॥

स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि ।
त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ॥

स्थालीस्थानं गतोश्वत्थं शमीगर्भं विलक्ष्य सः ।
तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥

उर्वशीं मन्त्रतो ध्यायन् .... ।
.... ॥

तस्य निर्मन्थनाज्जातो जातवेदा विभावसुः ।
त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥

तेनायजत यज्ञेशं भगवन्तमधोऽक्षजम् ।
उर्वशीलोकमन्विच्छन्सर्वदेवमयं हरिम् ॥

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ।
देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥

पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप ।
अग्निना प्रजया राजा लोकं गन्धर्वमेयिवान् ॥

Devî-Bhâgavata Skandha I. Adh. 13 mentions this story and appears to be an abstract of the above, certain expressions being almost identical.

कथासरित्सागर ३. ४—३०.

आसीत्पुरूरवा नाम राजा परमवैष्णवः ।
अभूद्भुवीव नाकेऽपि यस्याप्रतिहता गतिः ॥

भ्रमन्तं नन्दने जातु तं ददर्श किलाप्सराः ।
उर्वशी नाम कामस्य मोहनास्त्रमिवापरम् ॥
दृष्टमात्रेण तेनाभूत्सा तथा हृतचेतना ।
यथा सभयरम्भादिसखीचेतांस्यकम्पयत् ॥
सोऽपि तां वीक्ष्य लावण्यरसनिर्झरिणीं नृपः ।
यन्न प्राप परिष्वङ्गं तृषाक्रान्तो मुमूर्च्छ तत् ॥
अथादिदेश सर्वज्ञो हरिः क्षीराम्बुधिस्थितः ।
नारदाख्यं मुनिवरं दर्शनार्थमुपागतम् ।
देवर्षे नन्दनोद्यानवर्ती राजा पुरूरवाः ।
उर्वशीहृतचित्तः सन्स्थितो विरहनिःसहः ॥
तद्गत्वा मम वाक्येन बोधयित्वा शतक्रतुम् ।
दापय त्वरितं तस्मै राज्ञे तामुर्वशीं मुने ॥
इत्यादिष्टः स हरिणा तथेत्यागत्य नारदः ।
प्रबोध्य तं तथाभूतं पुरूरवसमब्रवीत् ॥
उत्तिष्ठ त्वत्कृते राजन्प्रहितोऽस्मीह विष्णुना ।
स हि निर्व्याजभक्तानां नैवापदमुपेक्षते ।
इत्युक्त्वाश्वासितेनाथ स पुरूरवसा सह ।
जगाम देवराजस्य निकटं नारदो मुनिः ॥
हरेर्निदेशमिन्द्राय निवेद्य प्रणतात्मने ।
उर्वशीं दापयामास स पुरूरवसे ततः ॥
तदभूदुर्वशीदानं निर्जीवकरणं दिवः ।
उर्वश्यास्तु तदेवासीन्मृतसंजीवनौषधम् ॥
अथाजगाम भूलोकं तामादाय पुरूरवाः ।
स्वर्वधूदर्शनाश्चर्यमर्पयन्मर्त्यचक्षुषाम् ॥
ततोऽनपायिनौ तौ द्वावुर्वशी च नृपश्च सः ।
अन्योन्यदृष्टिपातेन निबद्धाविव तस्थतुः ॥
एकदा दानवैः साकं प्राप्तयुद्धेन वज्रिणा ।
साहायकार्थमाहूतो ययौ नाकं पुरूरवाः ॥
तत्र तस्मिन्हते मायाधरनाम्न्यसुराधिपे ।
प्रवृत्तस्वर्वधूसार्थः शक्रस्याभवदुत्सवः ॥
ततश्च रम्भां नृत्यन्तीमाचार्ये तुम्बुरौ स्थिते ।
चलिताभिनयां दृष्ट्वा जहास स पुरूरवाः ॥

जाने दिव्यमिदं नृत्तं किं त्वं जानासि मानुष ।
इति रम्भापि तत्कालं सासूयं तमभाषत ॥

जानेऽहमुर्वशीसङ्गात्तद्यद्वेत्ति न तुम्बुरुः ।
युष्मद्गुरुरपीत्येनामुवाचाथ पुरूरवाः ॥

तच्छ्रुत्वा तुम्बुरुः कोपात्तस्मै शापमथादिशत् ।
उर्वश्या ते वियोगः स्यादा कृष्णाराधनादिति ॥

श्रुतशापश्च गत्वैव तमुर्वश्यै पुरूरवाः ।
अकालाशनिपातोग्रं स्ववृत्तान्तं न्यवेदयत् ॥

ततोऽकस्मान्निपत्यैव निन्ये क्वाप्यपहृत्य सा ।
अदृष्टैस्तेन भूपेन गन्धर्वैरुर्वशी किल ॥

अवेत्य शापदोषं तं सोऽथ गत्वा पुरूरवाः ।
हरेराराधनं चक्रे ततो बदरिकाश्रमे ॥

उर्वशी तु वियोगार्ता गन्धर्वविषयस्थिता ॥
आसीन्मृतेव सुप्तेव लिखितेव विचेतना ॥

आश्चर्यं यन्न सा प्राणैः शापान्ताशावलम्बिनी ।
मुक्ता विरहदीर्घासु चक्रवाकीव रात्रिषु ॥

पुरूरवाश्च तपसा तेनाच्युतमतोषयत् ।
तत्प्रसादेन गन्धर्वा मुमुचुस्तस्य चोर्वशीम् ॥

शापान्तलब्धया युक्तः पुनरप्सरसा तया ।
दिव्यान्स राजा बुभुजे भोगान्भूतलवर्त्यपि ॥

हरिवंश अ. १०; २६.

अकरोत्पुत्रकामस्तु मनुरिष्टिं प्रजापतिः ।
मित्रावरुणयोस्तात पूर्वमेव विंशापते ॥

मित्रावरुणयोरंशे मुनिराहुतिमाजुहोत् ।
तत्र दिव्यांबरधरा दिव्याभरणभूषिता ।
दिव्यसंहनना चैव इला जज्ञे इति श्रुतिः ॥

तामिलेत्येव होवाच मनुर्दण्डधरस्तदा ।
अनुगच्छस्व मां भद्रे तमिला प्रत्युवाच ह ॥

मित्रावरुणयोरंशे जातास्मि वदतां वर ।
तयोः सकाशं यास्यामि न मां धर्मो हतोवधीत् ॥

सैवमुक्त्वा मनुं देवं मित्रावरुणयोरिला ।
गत्वान्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् ॥
अंशेस्मि युवयोर्जाता देवौ किं करवाणि वाम् ।
मनुनाचाहमुक्ता वै अनुगच्छस्व मामिति ॥
तां तथा वादिनीं साध्वीमिलां धर्मपरायणाम् ।
मित्रश्च वरुणश्चोभावूचतुर्यन्निबोध तत् ॥
आवयोस्त्वं महाभागे ख्यातिं कन्येति यास्यसि ।
मनोर्वंशधरः पुत्रस्त्वमेव च भविष्यसि ॥
सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने ।
निवृत्ता सा तु तच्छ्रुत्वा गच्छन्ती पितुरन्तिकं ॥
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ।
सोमपुत्राद्बुधाद्राजंस्तस्यां जज्ञे पुरूरवाः ॥

बुधस्य तु महाराज विद्वान्पुत्रः पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥
तं ब्रह्मवादिनं क्षांतं धर्मज्ञं सत्यवादिनम् ।
उर्वशी वरयामास हित्वा मानं यशस्विनी ॥
तया सहावसद्राजा वर्षाणि दश पञ्च च ।
पञ्च षट् सप्त चाष्टौ च दश चाष्टौ च भारत ॥
वने चैत्ररथे रम्ये तथा मंदाकिनीतटे ।
अलकायां विशालायां नन्दने च वनोत्तमे ॥
उत्तरान् स कुरून् प्राप्य मनोरथफलद्रुमान् ।
गन्धमादनपादेषु मेरुपृष्ठे तथोत्तरे ॥
एतेषु वनमुख्येषु सुरैराचरितेषु च ।
उर्वश्या सहितो राजा रेमे परमया मुदा ॥
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ।
राज्यं च कारयामास प्रयागे पृथिवीपतिः ॥
तस्य पुत्रा बभूवुस्ते सप्त देवसुतोपमाः ।
दिवि जाता महात्मान आयुर्धीमानमावसुः ॥
विश्वायुश्चैव धर्मात्मा श्रुतायुश्च तथापरः ।
दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः ॥

Here follows the story just as it is found in the Vishṇu-Purâṇa.

एवंप्रभावो राजासीदैलस्तु नरसत्तम ।
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ॥
राज्यं स कारयामास **प्रयागे** पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥

The Vâyupurâṇa mentions the story in almost the same words as above with a few variations as below :—

उत्तरान् स कुरून्प्राप्य **मनोरथफलद्रुमान्**—Vâyu P. reads कलापग्राममेव च for मनोरथ°

उत्तरे **जाह्नवीतीरे**—Vâyu P. reads यामुने तीरे.

Vâyu Purâṇa further gives only six sons instead of the seven of the Harivaṃs'a.

वेदार्थदीपिका A commentary of षड्गुरुशिष्य on सर्वानुक्रमणी—explaining the legend in connection with R. V. X. 95 says:—

ऐलोर्वशीतिहासोत्र वैस्पष्ट्याय प्रवर्ण्यते ।
मित्रश्च वरुणश्चोभौ दीक्षितौ प्रेक्ष्य चोर्वशीम् ।
चलचित्तौ ततश्चैतौ कुंभे निहितशुक्रकौ ॥
तां शप्तवंतौ मनुष्यभोग्या भूम्यां वसेति ह ।
अत्रांतर इलो राजा मनुपुत्रैश्च संयुतः ॥
मृगयां संचरन्साश्वो देव्याः क्रीडं विवेश ह ।
तत्र देवं गिरिसुता सर्वैर्भावैरतोषयत् ॥
अत्राविशन्पुमान्स्त्री स्यादित्युक्त्वा तत्र चाविशत् ।
स्त्रीभूत्वा व्रीडितः सोगाच्छरणं शिवमञ्जसा ॥
इयं प्रसाद्यतां राजन्नित्युक्तः शंभुना नृपः ।
जगाम शरणं देवीमात्मनः पुंस्त्वसिद्धये ॥
अकरोत्सा नृपं देवी षण्मासात्प्राप्तपुंस्त्वकम् ।
ततः कदाचित्स्त्रीकाले बुधः सौन्दर्यमोहितः ॥
अप्सरोभ्यो विशिष्टां तां चकमे नृपयोषितम् ।
तत्रेलायां सोमपुत्राज्जातो राजा पुरूरवाः ॥
तमूर्वशी तु चकमे प्रतिष्ठानपुरे स्थितम् ।
तल्पादन्यत्र नग्नं त्वां दृष्ट्वा यामि यथागतम् ॥

सुताबुरणकौ तत्र समीपे कुरु मे दृढम् ।
इति सा समयं कृत्वा रमयामास तं नृपम् ॥
चतुरब्दे गते रात्रौ देवैरुरणकद्वयम् ।
हृतं तस्य ध्वनिं श्रुत्वा नग्न एव स भूपतिः ॥
उत्थाय जित्वागच्छेयमित्येवं तल्पतोऽन्यतः ।
विद्युता दर्शितोऽथास्यै नग्न एव पुरूरवाः ॥
अथ सा नष्टसमया ह्युर्वशी तु दिवं ययौ ।
तत उन्मत्तवद्राजा दिदृक्षुस्तामितस्ततः ॥
कुर्वन्नन्वेषणं तीरे सरसो मानसस्य ताम् ।
विचरंतीमप्सरोभिः सहापश्यत्पुरूरवाः ॥
पुनः स चकमे भोक्तुमुर्वशीं पूर्ववन्नृपः ।
सा स्वशापस्य मुक्तत्वात्प्रत्याचष्टे व्रजेति तम् ॥

मत्स्यपुराण अ. २४.

इलोदरे च धर्मिष्ठं बुधः पुत्रमजीजनत् ।
अश्वमेधशतं साग्रमकरोद्यः स्वतेजसा ।
पुरूरवा इति ख्यातः सर्वलोकनमस्कृतः ॥
अहन्यहनि देवेन्द्रं द्रष्टुं याति स राजराट् ।
कदाचिदारुह्य रथं दक्षिणाम्बरचारिणम् ॥
सार्धमर्केण सोऽपश्यन्नीयमानामथाम्बरे ।
केशिना दानवेन्द्रेण **चित्रलेखामथोर्वशीम्** ॥
तं विनिर्जित्य समरे विविधायुधपाणिना ।
बुधपुत्रेण **वायव्यमस्त्रं** मुक्त्वा यशोऽर्थिना ॥
तथा शक्रोपि समरे येन चैवं विनिर्जितः ।
मित्रत्वमगमद्देवैर्ददाविन्द्राय चोर्वशीम् ॥
ततः प्रभृति मित्रत्वमगमत्पाकशासनः ।
लक्ष्मीस्वयंवरं नाम **भरतेन** प्रवर्तितम् ।
मेनकामुर्वशीं रम्भां नृत्येति तदादिशत् ॥
ननर्त सलयं यत्र **लक्ष्मीरूपेण चोर्वशी** ।
सा पुरूरवसं दृष्ट्वा नृत्यन्ती कामपीडिता ॥
विस्मृताभिनयं सर्वं यत्पुरा भरतोदितम् ।
शशाप भरतः क्रोधाद्वियोगादस्य भूतले ॥

पञ्चपञ्चाशदब्दानि लता सूक्ष्मा भविष्यसि ।
पुरूरवाः पिशाचत्वं तत्रैवानुभविष्यति ॥
ततस्तमुर्वशी गत्वा भर्तारमकरोच्चिरम् ।
शापान्ते भरतस्याथ उर्वशी बुधसूनुतः ॥
अजीजनत्सुतानष्टौ नामतस्तान्निबोधत ।
आयुर्दृढायुरश्वायुर्धनायुर्धृतिमान्वसुः ।
शुचिविद्यः शतायुश्च सर्वे दिव्यबलौजसः ॥

MAX MÜLLER'S CHIPS VOL. IV. RE-ISSUE PP. 107 & FF.

"One of the myths of the Veda which expresses this correlation of the Dawn and the sun, this love between the immortal and the mortal, and the identity of the Morning Dawn and the Evening twilight, is the story of Urvas'î and Purûravas. The two names Urvas'î and Purûravas are to the Hindu mere proper names, and even in the Veda their original meaning has almost entirely faded away. There is a dialogue in the Rig-veda between Urvas'î and Purûravas, where both appear personified in the same manner as in the play of Kâlidâsa. The first point, therefore, which we have to prove is that Urvas'î was originally an appellation, and meant dawn.

The etymology of Urvas'î is difficult. It cannot be derived from Urva by means of the Suffix s'a, because there is no such word as Urva, and because derivatives in s'a, like romas'a, yuvas'a, etc., have the accent on the last syllable. I therefore accept the common Indian explanation by which this name is derived from Uru, wide and a root as', to pervade, and thus compare Urv-as'î with another frequent epithet of the Dawn, Urûchî, the feminine of Uru-ach, far-going. It was certainly one of the most striking features, and one by which the Dawn was distinguished from all the other dwellers in the heavens, that she occupies the wide expanse of the sky, and that her horses run, as it were, with the swiftness of thought round the whole horizon. Hence we find that names beginning with Uru are almost invariably old mythological names of the Dawn or the twilight.........In the Veda the name of Ushas is hardly ever mentioned without some allusion to her far and wide spreading splendour; such as urviyâ vibhâti, she shines wide; urviyâ vichakshe, looking far and wide; varîyasî, the widest, whereas the light of the sun is not represented as widestretching, but rather as far-darting.

But there are other indications besides the mere names of Urvas'î, which lead us to suppose that she was originally the goddess of the dawn. Vasishṭha, though best known as the name of one of the chief poets of the Veda, is the superlative of vasu, bright; and as such also a name of the Sun. Thus it happens that expressions which apply properly to the Sun only were transferred to the ancient poet. He is called the son of Mitra and Varuṇa, night and day, an expression which has a meaning only with regard to Vasishṭha, the Sun; and as the Sun is frequently called the offspring of the dawn, Vasishṭha, the poet, is said to owe his birth to Urvas'î (Rv. VII. 33, 11.). The peculiarity of his birth reminds us strongly of the birth of Aphrodite, as told by Hesiod.

Again, we find that in the few passages where the name of Urvas'î occurs in the Rig-veda, the same attributes and actions are ascribed to her which usually belong to Ushas, the Dawn.

It is frequently said of Ushas that she prolongs the life of man, and the same is said of Urvas'î (V. 41, 19; X. 95, 10). In one passage (Rv. IV. 2, 18) Urvas'î is even used in the plural, like Ushasas, in the sense of many dawns or days increasing the life of man, which shows that the appellative power of the word was not yet quite forgotten. Again, she is called Antarikshaprâ, filling the air, a usual epithet of the Sun, Bṛihaddivâ, with mighty splendour, all indicating the bright presence of the dawn. However, the best proof that Urvas'î was the dawn is the legend told of her and of her love for Purûravas, a story that is true only of the Sun and the Dawn. That Purûravas is an appropriate name of a solar hero requires hardly any proof. Purûravas meant–endowed with much light; for though rava is generally used of sound, yet the root ru, which means originally to cry, is also applied to colour in the sense of a loud or crying colour, *i. e.* red (cf. ruber, rufus, Lith. rauda, O. H. G. rôt, rudhira; also Sanskrit ravi, sun). Besides, Purûravas calls himself Vasishṭha, which, as we know, is a name of the Sun; and if he is called Aida, the son of Idâ, the same name is elsewhere (Rv. III. 29, 3) given to Agni, the fire...

.........In the Rig-veda, in the last book we find a dialogue between the two celestial lovers. In one of the verses Urvas'î says, 'I am gone for ever, like the first of the Dawns,' which shows a strange glimmering of the old myth in the mind of the poet, and reminds us of the tears which the mother of Memnon shed over the corpse of her son, and which even by later poets are called morning dew. Again,

in the fourth verse, Urvas'î addressing herself, says: 'This person (that is to say, I), when she was wedded to him, O Dawn! she went to his house, and was embraced by him day and night? Again, she tells Purûravas that he was created by the gods in order to slay the powers of darkness (dasyuhatyâya), a talk invariably ascribed to Indra and other solar beings. Even the names of the companions of Urvas'î point to the dawn.

We must certainly admit, that even in the Veda, the poets were as ignorant of the original meaning of Urvas'î and Purûravas as Homer was of Tithonos, if not of Eos.......Antiquity spoke of the naked Sun, and of the chaste dawn hiding her face when she had seen her husband. Yet she says she will come again. And after the Sun has travelled through the world in search of his beloved, when he comes to the threshold of death and is going to end his solitary life, she appears again in the gloaming, the same as the Dawn—as Eos in Homer begins and ends the day—and she carries him away to the golden seats of the immortals..................The root of all the stories of Purûravas and Urvas'î, were short proverbial expressions, of which ancient dialects are so fond. Thus—'Urvas'î loved Purûravas,' meant 'the sun rises;' 'Urvas'î sees Purûravas naked,' meant 'the dawn is gone;' 'Urvas'î finds Purûravas again,' meant 'the sun is setting.'

BOMBAY SANSKRIT SERIES.

Edited under the superintendence of Prof. A. V. Kâthavate and Prof. S. R. Bhâṇḍârkar.

	Rs.	a.	p.
No. I.—Pañchatantra, Books IV. and V. Edited, with Notes, by Dr. G. Bühler	0	4	0
No. II.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. F. Kielhorn. The Sanskrit Text and various Readings, Part I....	0	8	0
No. III.—Pañchatantra, Books II. and III. Edited, with Notes, by Dr. G. Bühler...	0	4	0
No. IV.—Pañchatantra, Book I. Edited, with Notes, by Dr. F. Kielhorn	0	6	0
No. V.—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part I., Cantos I.—VI.... ...	1	8	0
No. VI.—Mâlavikâgnimitra: Sanskrit Play by Kâlidâsa. Edited, with Notes, by Shankar P. Pandit, M. A.	2	2	0
No. VII.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. F. Kielhorn. Part II. (Translation and Notes), Paribhâshâs I.—XXXVII.	0	8	0
No. VIII.—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part II., Cantos VII.—XIII.	0	12	0
No. IX.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. F. Kielhorn. Part II. (Translation and Notes), Paribhâshâs XXXVIII.—LXIX.	0	8	0
No. X.—The Das'akumâracharita of Daṇḍin. Part I. Edited, with Critical and Explanatory Notes, by Dr. G. Bühler...	0	8	0
No. XI.—The Nîtis'ataka and Vairâgyas'ataka of Bhartṛihari, with extracts from two Sanskrit Commentaries. Edited, with Notes, by Kâshinâth Trimbak Telang, M. A. (copies not available.) ...			

	Rs.	a.	p.
No. XII.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. F. Kielhorn. Part II. (Translation and Notes), Paribhâshâs LXX.—CXXII. ...	0	8	0
No. XIII.—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part III., Cantos XIV.—XIX	0	8	0
No. XIV.—Vikramâṅkadeva-Charita. Life of King Vikramâditya Tribhuvanamalla of Kalyâṇa, composed by his Vidyâpati Bilhaṇa. Edited, with an Introduction, by Dr. G. Bühler (copies not available).			
No. XV.—Mâlatî-Mâdhava: a Drama by Bhavabhûti. Edited, with Critical and Explanatory Notes, by Dr. R. G. Bhâṇḍârkar, M. A. (Second Ed. in the Press.)...			
No. XVI.—Vikramorvas'îya: a Drama by Kâlidâsa. Edited with Notes, by Shankar P. Pandit, M. A. (Third Edition.)	2	0	0
No. XVII.—Hemachandra's Des'înâmamâlâ. Edited, with Critical Notes, a Glossary and a Historical Introduction, by Professor R. Pischel and Dr. G. Bühler, Part I. Text and Critical Notes, by Professor Pischel.	1	0	0
No. XVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. I. complete. Parts I, II & III.	4	8	0
No. XIX. Ditto ditto by ditto. Vol. I. Part II.	1	0	0
No. XX. Ditto ditto by ditto. Vol. I. Part III.	1	0	0
No. XXI. Ditto ditto by ditto. Vol. II. Part I.	1	0	0
No. XXII. Ditto ditto by ditto. Vol. II. Part II.	1	0	0
No. XXIII. Vâsishṭhadharmas'âstra. Edited, with Notes, by Dr. A. A. Führer.	0	8	0
No. XXIV.—Kâdambarî by Bâṇa and his son. Vol. I. Sanskrit Text, complete. Edited by Dr. P. Peterson.	2	0	0
Do. Vol. II. Introduction and Notes, by do. ...	4	8	0
No. XXV.—Kîrti-Kaumudî. Edited, with Notes, by Prof. A. V. Kâthavaṭe. (copies not available.) ...			

	Rs.	a.	p.
No. XXVI.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol II. Part III. ...	1	0	0
No. XXVII.—Mudrârâkshasa, by Vis'âkhadatta, with the Commentary of Dhuṇḍirâja. Edited, with Notes, by K. T. Telang. (Copies not available.)			
No. XXVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. III. Part I. ...	1	0	0
No. XXIX.—Do. do. of do. by do. Vol. III. Part II.	1	0	0
No. XXX.—Ditto do. of do. by do. Vol. III. Part III.	1	0	0
No. XXXI.—Subhâshitâvalî of Vallabhadeva. Edited by Dr. P. Peterson and Pandit Durgâprasâda. ...	2	8	0
No. XXXII.—Tarka-Kaumudî of Laugâkshi Bhâskara. Edited by Professor M. N. Dvivedi (Copies not available.)			
No. XXXIII.—Hitopades'a of Nârâyaṇa. Edited by Dr. P. Peterson.	0	14	0
No. XXXIV.—The Gauḍavaho, by Vâkpati. Edited by Shankar P. Pandit, M. A.	3	0	0
No. XXXV.—Mahânârâyaṇa Upanishad. Edited by Colonel G. A. Jacob.	0	7	0
No. XXXVI.—University Selections of Hymns from the Ṛigveda. Edited by Dr. P. Peterson (2nd Edition.)	4	0	0
No. XXXVII.—S'ârṅgadharapaddhati. Edited by Dr. P. Peterson, Vol. I.	3	0	0
No. XXXVIII.—Naishkarmyasiddhi. Edited by Col. G. A. Jacob.	2	0	0
No. XXXIX.—A Concordance to the principal Upanishads and Bhagavadgîtâ, by the same author.	4	0	0
No. XL.—Eleven Atharvaṇa Upanishads, with Dîpikâs, by the same author	1	4	0
No. XLI.—A Handbook to the study of the Ṛigveda, by Dr. P. Peterson, Part I.	1	8	0
No. XLII.—The Das'akumâracharita of Daṇḍin, Part II. (completing Dr. G. Bühler's Edition). Edited, with Critical and Explanatory Notes, by Dr. P. Peterson.	0	8	0
No. XLIII.—A Handbook to the study of the Ṛigveda, by Dr. P. Peterson, Part II., comprising the Seventh Maṇḍala, with the commentary of Sâyaṇa.	2	8	0

	Rs.	a.	p.
No. XLIV.—Aphorisms of the Sacred Law of the Hindus, an Index of the Sûtras and the various Readings of the Hiraṇyakeshî-Dharmasûtra, by Dr. G. Bühler, Part I.	1	6	0
No. XLV.—Râjataraṅgiṇî. Edited by Pandit Durgâprasâd. Part I., containing the first 7 (seven) Taraṅgas.	1	8	0
No. XLVI.—Patañjali's Yogasûtras. Edited, with the Scholium of Vyâsa and the Commentary of Vâchaspati, by Mahâmahopâdhyâya Râjârâm Shâstrî Boḍas.	1	10	0
No. XLVII.—Parâs'ara Dharma Saṁhitâ with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. I. Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar. ...	2	2	0
No. XLVIII.—Do. do. of do. by do. Vol. I. Part II.	2	0	0
No. XLIX.—Nyâyakos'a. 2nd Edition. Edited by Mahâmahopâdhyâya Bhîmâchârya Zaḷkîkar.	6	0	0
No. L.—Âpastamba Dharmasûtra, Part II. Edited by Dr. G. Bühler.	1	2	0
No. LI.—Râjataraṅgiṇî. Edited by Pandit Durgâprasâd, Vol. II. Taraṅga VIII.	1	4	0
No. LII.—Mṛichchhakaṭika, Vol. I. with two Commentaries and various readings, by Mr. N. B. Godbole.	3	8	0
No. LIII.—Navasâhasâṅkacharita, Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar.	1	10	0
No. LIV.—Râjataraṅgiṇi of Kalhaṇa, Vol. III. Edited by Dr. P. Peterson.	1	2	0
No. LV.—Tarkasaṅgraha of Annambhaṭṭa. Edited with the author's Dîpikâ and Govardhana's Nyâyabodhinî and Critical and Explanatory Notes, by the late Rao Bahadur Y. V. Aṭhalye.	3	4	0
No. LVI.—Bhaṭṭi Kâvya or Râvaṇavadha; Vol. I. Edited with the commentary Sarvapathina of Mallinatha by Mr. Kamalâshankar P. Trivedi &c.	9	0	0
No. LVII.—Do. Vol. II. Edited by do.	6	0	0
No. LVIII.—A second selection of Hymns from the Rigveda. Edited by Dr. P. Peterson.	4	0	0
No. LIX.—Parâs'ara Dharma Saṁhitâ with the commentary of Sâyaṇa-Mâdhavâchârya, Vol. II. Part I. Edited by Pandit Vâman Shâstri Islâmpurkar. ...	4	0	0
No. LX.—Kumârapâlacharita by Hemachandra. Edited, with a commentary, by the late Mr. S. P. Pandit...	8	8	0

	Rs.	a.	p.
No. XLIV.—Aphorisms of the Sacred Law of the Hindus, an Index of the Sûtras and the various Readings of the Hiraṇyakeshî-Dharmasûtra, by Dr. G. Bühler, Part I.	1	6	0
No. XLV.—Râjataraṅgiṇî. Edited by Pandit Durgâprasâd. Part I., containing the first 7 (seven) Taraṅgas.	1	8	0
No. XLVI.—Patañjali's Yogasûtras. Edited, with the Scholium of Vyâsa and the Commentary of Vâchaspati, by Mahâmahopâdhyâya Râjârâm Shâstrî Boḍas.	1	10	0
No. XLVII.—Parâs'ara Dharma Saṁhitâ with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. I. Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar. ...	2	2	0
No. XLVIII.—Do. do. of do. by do. Vol. I. Part II.	2	0	0
No. XLIX.—Nyâyakos'a. 2nd Edition. Edited by Mahâmahopâdhyâya Bhîmâchârya Zaḷkîkar.	6	0	0
No. L.—Âpastamba Dharmasûtra, Part II. Edited by Dr. G. Bühler.	1	2	0
No. LI.—Râjataraṅgiṇî. Edited by Pandit Durgâprasâd, Vol. II. Taraṅga VIII.	1	4	0
No. LII.—Mṛichchhakaṭika, Vol. I. with two Commentaries and various readings, by Mr. N. B. Godbole.	3	8	0
No. LIII.—Navasâhasâṅkacharita, Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar.	1	10	0
No. LIV.—Râjataraṅgiṇi of Kalhaṇa, Vol. III. Edited by Dr. P. Peterson.	1	2	0
No. LV.—Tarkasaṅgraha of Annambhaṭṭa. Edited with the author's Dîpikâ and Govardhana's Nyâyabodhinî and Critical and Explanatory Notes, by the late Rao Bahadur Y. V. Aṭhalye.	3	4	0
No. LVI.—Bhaṭṭi Kâvya or Râvaṇavadha; Vol. I. Edited with the commentary Sarvapathina of Mallinatha by Mr. Kamalâshankar P. Trivedi &c.	9	0	0
No. LVII.—Do. Vol. II. Edited by do.	6	0	0
No. LVIII.—A second selection of Hymns from the Rigveda. Edited by Dr. P. Peterson.	4	0	0
No. LIX.—Parâs'ara Dharma Saṁhitâ with the commentary of Sâyaṇa-Mâdhavâchârya, Vol. II. Part I. Edited by Pandit Vâman Shâstri Islâmpurkar. ...	4	0	0
No. LX.—Kumârapâlacharita by Hemachandra. Edited, with a commentary, by the late Mr. S. P. Pandit...	8	8	0